Publication Series 1

SADVIDYAVILASA

(RASANUBHUTIVYAKHYASAMVALITAH)
of
MAHAMAHOPADHYAYA

TYAGARAJADHVARINDRA

(Mannārgudi Sri Raju Sāstrigal)

Published by :
ADI SANKARA ADVAITA RESEARCH CENTRE,
MADRAS.
1982

ADI SANKARA ADVAITA RESEARCH CENTRE, Publication Series 1.

SADVIDYAVILASA

(RASANUBHUTIVYAKHYASAMVALITAH)

of

MAHAMAHOPADHYAYA

TYAGARAJADHVARINDRA

(Mannargudi Sri Raju Sastrigal)

Edited by :

Atmavidyabhusanam, Sahityavisarada,
Sahityavedantasiromani

V. S. V. Guruswami Sastrigal, P. O. L.
Rtd. Professor of Vedanta,
Govt. Sanskrit College, Trivandrum.
Recipient of President's award.

and

Bhasyabhavajna, Sahityavisarada,
Sahityavedantasiromani

V. R. Kalyanasundara Sastrigal
Guest Lecturer,
Sri Ramakrishna Mission,
Vivekananda College, Madras-4.
Recipient of President's award.

श्री अखण्डानन्द पुस्तकालय
संख्या ५६९
विषय

MADRAS.

1982 Price : Rs. 15/-

This Book is from:
GIRI TRADING AGENCY
Opp: P. O.
Matunga, Bombay-400 019

आदिशङ्कराद्वैतविमर्शसमितिप्रकाशितः प्रथमो ग्रन्थः

सद्विद्याविलासः

(रसानुभूतिव्याख्यासंवलितः)

महामहोमाध्यायैः

श्रीत्यागराजाध्वरीन्द्रैः

(मन्नार्गुडिराजुशास्त्रिभिः)
विरचितः

आत्मविद्याभूषणैः, साहित्यविशारदैः, साहित्यवेदान्तशिरोमणिभिः,
अनन्तशयनस्थराजीयसंस्कृतकलाशालाप्राध्यापकचरैः
राष्ट्रपतिसम्मानितैः

व. श. वैं. गुरुस्वामिशास्त्रिभिः

भाष्यभावज्ञैः, साहित्यवेदान्तशिरोमणिभिः,
रामकृष्णमठीय विवेकानन्दकलाशालासंस्कृताध्यापकैः
राष्ट्रपतिसम्मानितैः

व. रा. कल्याणसुन्दरशास्त्रिभिश्च

परिशोधितः

आदिशङ्कराद्वैतविमर्शसमित्या
प्रकाशितः

मद्रपुरीः—८

१९८२

श्री अखण्डानन्द पुस्तकालय
संख्या ५८६
विषय ६
गोकुलित न्यास आनन्द कुटीर मोतीझील

PREFACE

In accordance with the desire and blessings of HIS HOLINESS SRI JAYENDRA SARASWATHI SWAMIGAL OF SRI KANCHI KAMAKOTI PEETHAM this book viz. SADVIDYAVILASA of Sri Tyagarajadhvarindra (Mannargudi Sri Raju Sastrigal) is published by the Adi Sankara Advaita Research Centre, Madras. Sadvidyavilasa is a summary in the form of verses to the sixth chapter of Chandogyopanisad. This is coupled with the author's own commentary called Rasanubhuti. Since the first publication of this book sixty years have gone by and the book is not available now. So we are bringing out this precious book correcting the printing mistakes found in the original and with necessary appendices. We hope that this book will be of immense help and a guide to the lovers of Advaita philosophy. The readers are requested to turn to the preface written in Sanskrit for the details pertaining to the author, his works and the detailed content of Sadvidyavilasa.

Our hearty thanks go to Sri J. R. S. Vasan Ramanan, M.A., M. Phil., Asst. Professor of Sanskrit, Sri R. K. Mission, Vivekananda college, Madras-4, who has been very kind to copy the original and to go through the proof.

Our grateful thanks go to the NATHAN PRINTING PRESS, Madras-4 for bringing out this book.

Madras-17
10-4-1982

V. S. V. Guruswamy Sastri.

आनन्द कुटीर मोतीझील

भूमिका

श्रीकाञ्ची कामकोटि पीठाधिप जगद्गुरु श्रीचन्द्रशेखरेन्द्रसरस्वतीशिष्याणां, श्रीकाञ्ची कामकोटि पीठाधिपानां जगद्गुरूणां श्रीमज्जयेन्द्रसरस्वती श्रीचरणानां सानुग्रहया आज्ञया श्रीत्यागराजाध्वरिप्रणीतः सद्विद्याविलासाख्यः प्रबन्धः सव्याख्यः, आदिशङ्कराद्वैतविमर्शसमित्या मुद्राप्य प्रकाशीक्रियते ।

सद्विद्याविलासः तद्व्याख्या रसानुभूतिश्च

वेदेषु चतुर्षु सामवेदः प्रशस्तः भगवद्रूपत्वात् तदुक्तं भगवता "वेदानां सामवेदोऽस्मि" इति । तस्मिन्वेदे विराजमाना अष्टाध्यायी छान्दोग्योपनिषत् नितरां प्रशस्ततरा । रुच्युत्पादकसंनिकर्षबोधकोपदेशप्रदाभ्यासोपदेशिषु 'प्रज्ञानं ब्रह्म' "अयमात्मा ब्रह्म" "तत्त्वमसि" "अहं ब्रह्मास्मि" इत्येवंरूपेषु चतुर्षु महावाक्येषु उपदेशप्रदं प्रशस्ततमं तत्त्वमसि महावाक्यमस्यामेव छान्दोग्योपनिषदि षष्ठे प्रपाठके श्वेतकेतवे नवकृत्वः उद्दालकमुनिना समुपदिश्यमानं विद्योतते ॥ छान्दोग्योपनिषद्गते षष्ठे प्रपाठके षोडश खण्डा विद्यन्ते । तत्र (१) एकविज्ञानात्सर्वविज्ञानं (२) सतः कारणत्वं अतस्तेजोबन्नसृष्टिः (३) त्रिवृत्करणं (४) त्रिवृत्करणे दृष्टान्तप्रदर्शनं (५) पुरुषशरीरे तेजोबन्नानां त्रेधा परिणामः (६) दधिमथनदृष्टान्तेन वाक्प्राणमनसां तेजोबन्नसूक्ष्मपरिणामत्वम् (७) पञ्चदशदिवसानशनोपदेशेन मनसो अन्नसूक्ष्मपरिणामत्वम् (८) सुषुप्ति-क्षुत्-पिपासा-मरण तत्वनिरूपणद्वारा सर्वस्यैव प्रपञ्चस्य सन्मूलत्वं सदायतनत्वं सत्प्रतिष्ठत्वमुपपाद्य उद्दालकेन तादृशसद्रूपब्रह्मरूपता तत्वमसीति श्वेतकेतवे उपदिश्यत इति आद्येन खण्डाष्टकेन प्रतिपाद्यते । द्वितीयेन खण्डाष्टकेन स्वस्य सद्रूप—ब्रह्मात्मभावे श्वेतकेतोः संभवत्संशयानामपाकरणाय मधु-नदी-वृक्ष-न्यग्रोध-सैन्धव-गान्धारपुरुष-सत्सम्पत्तिक्रम-तप्तपरशुग्रहणरूपाः, अष्टावंशा निरूप्यन्ते । उपक्रमोपसंहाराभ्यासार्थवादोपपत्त्यपूर्वत्वफललक्षणैः षड्भिस्तात्पर्यलिङ्गैः सद्रूपब्रह्मणः षष्ठप्रपाठके सम्यक्प्रतिपादनात् अयं प्रपाठको वृद्धैः सद्विद्येति व्यपदिश्यते ।

श्रीत्यागराजाध्वरिणश्चेमामेव सद्विद्यां, सद्विद्याविलासाभिधे स्वग्रन्थे सविशदमुपवर्णयन्ति। सद्रूपब्रह्मविद्याया विशेषतोऽभिव्यक्तिहेतुत्वादेव स्वग्रन्थस्य सद्विद्याविलास इत्याख्यामकल्पयन्। अयं च ग्रन्थः स्रग्धरावृत्तविभूषिताष्टाविंशतिसंख्याकश्लोकात्मकः। तत्र पञ्चभिः श्लोकैः उपोद्घातः, एकेन ग्रन्थसमर्पणं, शिष्टैर्द्वाविंशतिश्लोकैः षोडशखण्डार्थनिरूपणञ्च भवति।

रसानुभूतिरिति पूर्वोक्तश्लोकात्मकमूलग्रन्थस्याशयाविष्करणपरा गद्यमयी व्याख्यापि मूलकृद्भिरेव त्यागराजाध्वरिभिर्व्यरचि ॥ व्याख्यायामस्यां तत्र तत्र मूलार्थविवरणावसरे, व्याकरणमीमांसान्यायशास्त्रसम्बन्धिनः सुगहना अपि अर्थाः सरसमभिधीयन्ते ॥

एतद्ग्रन्थगतो विशेषनिर्देशार्होंऽशः

(१) "उत तमादेशमप्राक्ष्यः" इत्यत्र श्रूयमाणादेशपदस्य घञन्तस्य सुविस्तरमर्थविचारः (२) "तत्त्वमसी" त्यत्र मध्वाचार्यप्रदर्शितं पञ्चविधं क्लिष्टव्याख्यानमनूद्य सयुक्तिकं तस्य निराकरणं (४) अत्रैव—रामानुजाचार्योक्तं शरीरशरीरिभावनिबन्धनं सामानाधिकरण्यमनूद्य सयुक्तिकं तन्निराकरणञ्च ॥ वेदान्तसारार्थबोधकः अयं ग्रन्थः सर्वेषां व्युत्पित्सूनां विदुषां चोपकारको भवति। यद्यप्ययं ग्रन्थः, षष्ठिसंवत्सरेभ्यः प्राक् मुद्राप्य प्रकाशितस्तथापि न कुत्राप्ययं लभ्यते। किंच—मुद्रितपुस्तके अवतारिका-मूलव्याख्याभेदो दुर्विवेको भवति। अक्षरपदवाक्यविपर्यासो भूयानुपलभ्यते। प्रमाणत्वेन समुद्धृतानामितरग्रन्थानामाकरादिसूचनापि न प्रदर्शिता। पूर्वोक्तानां दोषाणां परिहाराय एतद्ग्रन्थलिप्सूनां ग्राहकजनानां लाभसौकर्याय चादिशङ्कराद्वैतविमर्शसमित्या पुनर्मुद्राप्य प्रकाश्यते। वेल्लङ्कोण्डं रामरायकविः वेदान्तमुक्तावल्यां सद्विद्यां षड्विंशतिसंख्याकैः पद्यैरवर्णयत्। तथा श्रीनारायणतीर्थस्वामिभिः कृष्णलीलातरङ्गिण्यां सद्विद्येय विंशतिसंख्याकैः पद्यैः समुपवर्णि। सर्वथा त्यागराजाध्वरिरचितः रसानुभूत्यलङ्कृतः सद्विद्याविलासः पूर्वोक्तग्रन्थद्वयापेक्षया वैशिष्ट्यमावहत्येवेत्येतत् ग्रन्थत्रयं परिशीलयतां प्रकटमेव भवेत्। अथैतद्ग्रन्थकर्तॄन् त्यागराजाध्वरीन्द्रान् अधिकृत्य किञ्चिल्लिखामः।

श्रीत्यागराजाध्वरीन्द्राः

महामहोपाध्यायाः श्रीत्यागराजाध्वरिवराः राजुशास्त्रिण इत्यपराभिधानाः श्रीमद्भारद्वाजकुलजलधिकौस्तुभ श्रीमदप्पय्यदीक्षितेन्द्रवंशमौक्तिकाः। एते 1815 A. D. युवसंवत्सरे वैशाखमासि कृष्णपक्षे पञ्चम्यां श्रवणर्क्षे भानुवारे श्रीमार्गसहायवेङ्कटसुब्रह्मण्यदीक्षितस्य श्रीमरकतवल्लयम्बायाश्च सत्पुत्रतया प्रादुर्बभूवुः। एतेषां—वेदेषु वेदाङ्गेषु च तत्पितामहचरणाः श्रीत्यागराजाध्वरिण एव गुरवः। श्रीगोपालाचार्याश्च न्यायशास्त्रे गुरवः। श्रीनारायणयोगीन्द्रा एव ब्रह्मविद्यागुरवः। एते त्यागराजाध्वरीन्द्राः चम्पकारण्ये निवसन्तः षष्टिसंवत्सरकालं पूर्वमीमांसायां वेदान्तशास्त्रे न्यायशास्त्रे, व्याकरणशात्रे धर्मशास्त्रे च स्मार्तान् वैष्णवांश्च संन्यासिनो गृहस्थांश्च बहूनध्याप्य तेषु पञ्चसप्तति संख्याकान् विश्वविश्रुतान् विशिष्टपण्डितांश्चक्रुः। तेषु कांश्चित् नामतो निर्दिशामः। वेदान्तिनः संन्यासिनः (१) बालकृष्णानन्दः (२) रामकृष्णानन्दः (३) महादेवाश्रमिणः (४) दक्षिणामूर्तिस्वामिनः (५) महाराष्ट्रदेशीया यतिनः (६) सच्चिदानन्दस्वामिनः (६) ब्रह्मानन्दस्वामिनः। तार्किकाः वैष्णवाः (१) कृष्णमाचार्यः (२) रामानुजाचार्यः (३) रङ्गाचार्यः (४) वेङ्कटाचार्यः (५) वरदाचार्यः। सर्वशास्त्रविदः (१) महामहोपाध्यायाः पङ्गानाड् गणपतिशास्त्रिणः (२) महामहोपाध्यायाः गोष्ठीपुरं हरिहरशास्त्रिणः (३) मध्यकावेरी श्रीनिवासशास्त्रिणः (४) महामहोपाध्यायाः यज्ञस्वामिशास्त्रिणः एतेषां पौत्राः चरमशिष्याश्च। एते चास्माकं गुरवः।

अध्वरीन्द्रैरमीभिः प्रणीता सप्तविंशतिसंख्याका इतरे प्रबन्धाः

(१) ताम्रपर्णीस्तुतिः (२) सामरुद्रसंहिताभाष्यम् (३) श्लोकद्वयीव्याख्योपेता (४) दुर्जनोक्तिनिरासः (५) शिवतत्वविवेकदीपिका (६) त्यागराजस्तवः व्याख्योपेतः (७) कावेरीनवरत्नमालिका (८) चतुःश्लोकी सव्याख्या (९) अर्धनारीश्वराष्टकम् (१०) श्रीत्यागराजरथोत्सववर्णनं (११) श्रीत्यागेशनमनस्मरणसन्तानम् (१२) श्रीराजगोपालनवरत्नमालिका (१३) श्रीराजगोपालोत्सवानुक्रमणिका (१४) स्मार्तशिवरात्रिनिर्णयः (१५) दीक्षि-

तनवरत्नमालिका सव्याख्या (१६) शिवमहिमकलिकास्तुतिव्याख्या (१७) नागरखण्डार्थसंग्रहः (१८) आर्तिहराष्टकं (१९) गङ्गाष्टकम् (२०) पुरुषार्थप्रबोधसंग्रहः (२१) श्रीसुन्दरेश्वरलीलासंग्रहः (२२) वेदान्तवादसंग्रहः (२३) प्रतिबन्ध्यशब्दसाधुत्वनिश्चयः (२४) व्यावहारिक शब्दसाधुत्वविचारः (२५) उपाधिविचारः (२६) श्रीमन्नारायणयोगीन्द्रकृतब्रह्मविद्यातरङ्गिणीव्याख्या (२७) न्यायेन्दुशेखरः न्यायभास्करखण्डनरूपः।

त्यागराजाध्वरिणां विद्यार्थिदशायामेव विशिष्टं पाण्डित्यमभवदिति विज्ञायते। षोडशवर्षस्त्यागराजः श्रीगोपालाचार्याणां सविधे मुक्तावलीं पठन् कदाचित् तद्गेहे एव देहलीमध्ये-अतिष्ठत्। तदा गोपालाचार्यैः सह महीशूरपुराभिजनाः महातार्किकाः शतकोटि श्रीरामशास्त्रिणः शास्त्रार्थचर्चां कुर्वन्त आसन्। "भ्रमस्थले रजतज्ञानत्वादेः जन्यतावच्छेदकत्वापेक्षया रजतत्वादेरेव-तथात्वस्वीकारे लाघवमत एव नैयायिकैरपो" ति रामशास्त्रिभिरर्धोक्ते एव त्यागराजः "द्वित्वप्रत्यक्षत्वस्य अपेक्षाबुद्धिकार्यतावच्छेदकत्वापेक्षया द्वित्वत्वजातेरेव तथात्वमुचितमिति नैयायिकानामभिमत" मित्यभाषत। तदाकर्ण्य विस्मितो रामशास्त्री कोऽसौ इति गोपालाचार्यमपृच्छत्। गोपालाचार्याः—अयं त्यागराजः मच्छिष्यः कुल-शीलाचार-विनय-निरुपमकविता-ग्रहणधारणपटुता-प्रतिभादिमान् श्रीमदप्पय्यदीक्षितवंशोद्भवः इति रामशास्त्रिनिकटे स्वशिष्यं प्रशशंसुः। एवं—प्रभावा एते महान्तः त्यागराजाध्वरीन्द्राः अधीति-बोध-आचरण-प्रचारणैः परमपावनं स्वजीवितं निर्वर्तयन्तः, अष्टाशीतिसंवत्सरान् चम्पकारण्ये सुखमजीवन्। शुभकृत्संवत्सरकुम्भमासीयैकत्रिंशदिने (1903-A.D.) रात्रौ पञ्चदशघटिकायाः परं सकललोकसुकृतव्रातैः, उपासनामहिम्ना स्वात्मन्युपसंहृतकरणाः एते त्यागराजमखीन्द्राः परमात्मनि सदाशिवे ऐक्यमवापुः॥ त्यागराजाध्वरीन्द्रानेतानधिकृत्य विस्तरेण बुभुत्सुभिः तत्पौत्रैः महामहोपाध्यै श्रीयज्ञस्वामिशास्त्रिभिः विरचितः पञ्चोल्लासलसितः श्रीत्यागराजविजयः समवलोकनीयः। एतद्ग्रन्थस्यावसाने एतद्ग्रन्थमूलभूतः छान्दोग्यषष्ठप्रपाठकः षोडशखण्डात्मकः, अकारादिक्रमेण श्लोकानुक्रमणी, एतद्ग्रन्थपरामृष्टानामितरग्रन्थानां पट्टिका च संयोजिता विद्यन्ते।

एतद्ग्रन्थमुद्रणविषये, मुद्रणोपकारतया मूलग्रन्थलेखन-मुद्रितपत्रपरिशोधनादिकमावश्यकं कार्यमखिलं कृतवते श्रीमते वासन् रमणन् महाशयाय M. A. M. Phil. बिरुदधारिणे विवेकानन्दकलाशाला-संस्कृतविभागाध्यापकाय भगवान् साम्बपरमेश्वरः सर्वविधं श्रेयः प्रयच्छत्विति प्रार्थयामहे ॥

समीचीनतया ग्रन्थमेतं मुद्रितवतो मुद्रणालयाध्यक्षस्य श्रीविश्वनाथार्यस्य विषये कृतज्ञा भवामः ।

१०–४–१९८२
४, योगाम्बावीथी,
त्यागराजनगरी,
मद्रपुरी–१७

इत्थम्,

व. श. वै. गुरुस्वामिशास्त्री

विषयानुक्रमणिका

	पुटसंख्या
भूमिका	i
प्रथयखण्डार्थसंग्रहः	१
द्वितीयखण्डार्थसंग्रहः	४३
तृतीयखण्डार्थसंग्रहः	४५
चतुर्थखण्डार्थसंग्रहः	४७
पञ्चमखण्डार्थसंग्रहः	४८
षष्ठखण्डार्थसंग्रहः	४९
सप्तमखण्डार्थसंग्रहः	४९
अष्टमखण्डार्थसंग्रहः	५०
नवमखण्डार्थसंग्रहः	५५
दशमखण्डार्थसंग्रहः	५७
एकादशखण्डार्थसंग्रहः	५८
द्वादशखण्डार्यसंन्रहः	५८
त्रयोदशखण्डार्थसंग्रहः	६०
चतुर्दशखण्डार्थसंग्रहः	६०
पञ्चदशखण्डार्थसंग्रहः	६२
षोडशखण्डार्थसंग्रहः	६३
षष्ठाध्यायार्थसारसंग्रहनिरूपणम्	६४
ग्रन्थसमर्पणम्	६६
छान्दोग्यषष्ठाध्यायः	६९
सद्विद्याविलासान्तर्गतमूलश्लोकानुक्रमणिका	७७
रसानुभूतिव्याख्यायां परामृष्टा ग्रन्थाः	७८

॥ श्रीः ॥

सद्विद्याविलासः

(रसानुभूतिव्याख्यासंवलितः)

(अ. का.) प्रारिप्सितग्रन्थपरिसमाप्तिपरिपन्थिप्रत्यूहव्यूहप्रशमनाय प्रचयगमनाय च कृतं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति । प्रालेयेति—

(मू.) प्रालेयाचलकन्यकाकुचतटीकालेयकाङ्कस्फुर-
न्नीलेन्दीवरसोदरद्युतिगलं बालेन्दुचूडामणिम् ।
स्कन्देन द्विरदाननेन गणराड्वृन्देन नन्द्यादिना
वन्दे नन्दितमीशमादिमगुरुं मन्देतरश्रेयसे ॥ १ ॥

(व्या.) विघ्नेशस्कंदगौरीविलसितमसितग्रीवमानम्य देवं
ध्यायं ध्यायं पदाब्जं नतबहुफलदं ब्रह्मविद्यागुरूणाम् ।
श्रीसद्विद्याविलासं स्वयमुपरचितं पद्यरूपं मितोक्तिं
व्याचष्टे त्यागराजाभिधविबुधवरश्शुद्धये नैजबुद्धेः ॥

मन्देतरश्रेयसे ईशं वन्दे इत्यन्वयः । परममङ्गलावाप्तये परमशिवं प्रणमामि स्तौमीति वार्थः । "वदि अभिवादनस्तुत्योः" इत्यभियुक्तोक्तेः । इष्यमाणब्रह्मविद्याभिवृद्धिसिद्धये तं गुरुमूर्त्यात्मनाऽनुसंधत्ते । आदिमगुरुमिति । "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" (श्वे. ६-१८) "योऽग्रे मां विदधे पुत्रं ज्ञानं च प्रहिणोति मे" इत्यादिश्रुतिस्मृत्यनुसारेण स्वसृष्टस्य जगत्पितामहस्य ब्रह्मणोऽपि वेदोपदेष्टृत्वात् ब्रह्मविद्यासंप्रदायप्रवर्तकाचार्यपरम्पराविश्रान्तिस्थानभूतमित्यर्थः । तथा च पातञ्जलसूत्रम् । "स पूर्वेषामपि गुरुः कालेनानवच्छेदात्"

(यो. सू. १-२६) इति । अत्र स इत्यनेन "क्लेशकर्मविपाकाशयैः अपरामृष्टः पुरुषविशेष ईश्वरः" (यो. सू. १-२४) इति सूत्रे योगरूढ्या अनन्यसाधारणेश्वरशब्देनोक्तः शिवः परामृश्यते। "स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीम्" इत्यादितलवकारोपनिषदि

"पार्वती परमा देवी ब्रह्मविद्याप्रदायिनी ।
तस्मात्सह तया शक्त्या हृदि पश्यन्ति ये शिवम्" ॥

इत्यादिपुराणेषु च ब्रह्मविद्याधिदेवतात्वेन प्रसिद्धया पार्वत्या

"आदित्यस्य सदा पूजां तिलकस्वामिनस्तथा ।
महागणपतेश्चैव कुर्वन् सिद्धिमवाप्नुयात् ॥" (याज्ञ. १-२९४)

"सर्वमिच्छेद्गणाधिपात्" इत्यादिस्मृतिषु सर्वसिद्धिप्रदत्वेन प्रसिद्धाभ्यां गणेशस्कन्दाभ्यां भारते सौप्तिके प्रमथान् प्रस्तुत्य पठितात् "मनोवाक्कर्मभिर्भक्तान् पान्ति पुत्रानिवौरसान्" इति वचनात् भक्तपालकत्वेन प्रसिद्धैः देवव्रतरुद्राध्यायादिप्रकटितानुभावैः दिव्यगणैश्च सहितत्वेन "शशीपरिज्ञानमिदं तव स्थितं न देव पश्यन्ति कुदृष्टयो जनाः" । "ज्ञानचन्द्रकलाचूडदशदिग्बाहुमण्डलम्" इत्यादिवचनेषु ज्ञानरूपत्वेन प्रसिद्धचन्द्रकलावतंसत्वेन च तमनुसंधत्ते—प्रालेयेत्यादिना तत्तद्विशेषणेन। पार्वतीस्तनतटन्यस्तसुगन्धिद्रव्यविशेषानुलेपनचिह्नेनालिंगनभेदादौ संगतेन स्फुरन्नतिनीलकुवलयसमानकान्तिश्च कण्ठो यस्य तं। स्कंदेनेत्यादीनां संतोषितमित्यर्थकेन नन्दितमित्यनेनान्वयः। अत्र "चन्द्रज्योत्स्नाविशदपुलिन" इत्यादिवत् नीलेन्दीवरेति प्रयोगः। अलंकारादिकं तु सहृदयैस्स्वयमूह्यम्। विस्तरभयान्न लिख्यते। अतस्तत्तत्फलार्थं प्राधान्येन उपासनीया महाभागास्ते देवा अपि यस्य शेषभूताः तस्य शेषिणः परमशिवस्य महामहिमा निर्विवादः इति व्यज्यत इति बोध्यम् ॥ १ ॥

(अ. का.) एवं परमेश्वरप्रणामलक्षणं मंगलमारचय्य निजकुलकूटस्थपुण्यकृत्पुरुषधौरेयश्रीमदप्पय्यदीक्षितेन्द्राणामनुध्यानलक्षणमपि मंगलमाचरन्नेव स्वस्य प्रबन्धनिर्माणकुशलप्रकृष्टविद्वज्जनानुमोदनीयत्वाद्युत्कर्षप्राप्तिमाशास्ते ख्याता इति—

(मू.) ख्याताश्चाऽनवमतयैव सर्वलोकेष्व-
स्माभिर्नवमतयापि भाव्यमानाः ।
दिव्यास्ते परमशिवांशदीक्षितेन्द्राः
दिश्यासुर्दिशि दिशि देशिका जयश्रीः ॥ २ ॥

(व्या.) नवमशब्देनावमशब्देन च नञस्समासेऽनवम इति रूपं तुल्यम् । आद्ये "नलोपो नञः" (पा. सू. ६-३-७३) इति नञः नकारस्लोपात् । द्वितीये "तस्मान्नुडचि" (पा. सू. ६-३-७४) इत्यजादेरुत्तरपदस्य नुडागमाधिक्याच्च । तथा चानवमताशब्देन, "अनिन्द्यबन्धुगन्धम्" इत्यादौ अनिन्द्यादिशब्देन श्लाघ्यतावत्सर्वोत्तमत्वं बोध्यते । तथा नवमभिन्नत्वमपि । एवं च सर्वत्रापि अनवमतयैव ख्याता इत्येवकारेणावमत्वस्येव नवमत्वस्यापि क्वापि ख्यातिस्तेषां नास्तीत्यनवशब्दश्लेषमहिम्ना प्रतीयते । चकारोऽप्यर्थकः । तथा च प्रसिद्धा अपि अस्मादृशैर्नवमत्वेनापि चिन्त्यमाना भवन्तीति विरोधः । अस्मादृशानामपि सर्वलोकान्तर्गतत्वात् । स च सर्वोत्तमत्वरूपमनवमशब्दार्थमादायाभासीक्रियत इति विरोधाभासालंकारः । नवमतयापीत्यपिशब्दोऽस्मास्वपि तदनवमत्वभावनां समुच्चिनोति। अत्र नवानां पूरणो नवमः "तस्य पूरणे डट्" (पा. सू. ५-२-४८) इति डट्प्रत्यये "नान्तादसंख्यादेर्मट्" (पा. सू. ५-२-४९) इति मडागमे च नवमशब्दनिष्पत्तिः । १ दीक्षितानारभ्य २ नीलकण्ठदीक्षिताः ३ सिहृप्पय्यदीक्षिताः ४ मीनाक्षीवल्लभदीक्षिताः ५ गंगाधरदीक्षिताः ६ श्रीमार्गसहायमखिनः ७ अस्मत्पितामहचरणाः ८ पितृचरणाः ९ वयमिति क्रमेण गणनेऽस्माकं नवमत्ववत् अस्मानारभ्य प्रातिलोम्येन गणने तेषामपि नवमत्वानपायादिति भावः । ननु तेषामिदानीं अतीतत्वात् कथं तान्प्रत्याशासनमित्याशंक्य तन्मूर्त्युपलक्षितानां तेषां रूपान्तरेण इदानीमपि कैलासे सत्वात्तद्युक्तमिति परिहारमभिप्रेत्य विशिनष्टि । दिव्या इति । दिवि कैलासे भवा दिव्याः । "दिगादिभ्यो यत्" (पा. सू. ४-३-५४) इति यत्प्रत्ययः । शिवरहस्ये "शिवे दभ्रस्थाने भवति च ततोऽन्ते मम गणः" इति शिववचनादिति भावः । ते चतुरधिकशतसंख्याकलोकोत्तरतत्तच्छास्त्रप्रबन्धनिबन्धनप्रसिद्धतराः । परमशिवांशत्वं चानितरसाधारणतथाविधमहिमलिंगात् । शिवरहस्यादिषु तदंशभगवत्पादाचार्यावतारसमकक्ष्यतदवतारवर्णनात् "श्रीकण्ठोऽवततार यस्य वपुषा

कल्क्यात्मनेवाच्युतः' [1]इत्याद्यभियुक्तोक्तेश्चावगन्तव्यम्। अत एव अधुनातनान्प्रति देशिकत्वमप्युपपन्नम्। बहुकालव्यवहितानामपि स्वकीयपरिमलादिप्रबन्धद्वारा तदुपगमे बाधकाभावात्। एवमेव भगवत्पादाचार्यादिष्वपि अस्मान् प्रति तस्योपपाद्यत्वात्। जयः उत्कर्षप्राप्तिः जयतेरभिभवार्थस्य सकर्मकत्वेऽपि अस्याकर्मकत्वात् न इति कर्तरि षष्ठी। न च दिशतेः दानार्थकत्वेन तद्योगात् संप्रदानचतुर्थीयमिति शंक्यम्। 'रजकस्य वस्त्रं ददाति' इतिवत् अमुख्यार्थकत्वात् उत्पादनस्यैव इह दिशयर्थत्वात्। अस्तु वा चतुर्थी। ननु भाव्यमाना इति कर्मणि लटश्शानजादेशो दुर्लभः। 'लटश्शतृशानचावप्रथमासमानाधिकरणे' (पा. सू. ३-२-१२४) इति प्रथमान्तपर्युदासादिति चेन्न। 'वर्तमाने लट्' (पा. सू. ३-२-२३) इति पूर्वसूत्रात् लडित्यनुवर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम्। तेन "प्रथमासामानाधिकरण्येऽपि क्वचिदादेशौ भवतः" इति वैयाकरणैरंगीकृतत्वात्। सन् ब्राह्मण इत्यादौ शतुरिवात्र शानचोऽप्युपपत्तेरिति ॥ २ ॥

(अ. का.) चिकीर्षितग्रन्थप्रतिपाद्यात्मतत्वानुसंधानरूपमपि मङ्गलमाचरन्नेव— ननु न्यायशास्त्रे गादाधर्यादौ यत्किंचिदर्थाक्षेपसमाधानादिपरग्रन्थः कृतश्चेत् भूयसां तत्राधिकारित्वेन भूयानुपयोगस्तस्य भवेत्। वेदान्तार्थप्रतिपादकग्रन्थकरणे तु तत्राधिकारिणो 'मृतसंजीविनी तत्र मृग्यमाणदशां गता' इति न्यायेनात्यन्तदुर्लभतया तादृशग्रन्थस्य व्यर्थप्रायता स्यादित्याशङ्क्य सत्यमेवं अन्यत्राधिकारिबाहुल्यं अत्र तु तद्दौर्लभ्यमिति। तथापि महाविषयत्वमहाफलत्वाभ्यां प्राचीनानेकभवसंचितसुकृतसंभारसम्पन्नानां केषाञ्चिदधिकारिणां कथञ्चिल्लाभाच्चात्र प्रवृत्तिर्युज्यत इति तत्समाधानमभिसंधायाह अद्वैतेति—

(मू.) अद्वैतात्मा हि सर्वश्रुतिशिखरगिरां भावविश्रान्तिभूमि-
स्तल्लाभान्नास्ति लाभः पर इह सुलभो नैव विद्यां विनैषः।
सा खल्वज्ञानमूलं सकलमपि नृणां हन्ति संसारदुःखं
पूर्णानन्दं व्यनक्तीत्यत इयमखिलैर्ताप्यते किन्तु धन्यैः ॥ ३ ॥

[1] अभियुक्ताश्चात्र नीलकण्ठविजयचम्पूप्रणेतारः श्रीनीलकण्ठदीक्षिताः।

(व्या.) सकलवेदान्तमहातात्पर्यविषयत्वोक्त्या विषयमहत्वं प्रत्यगात्मस्वरूपानवच्छिन्नानन्दलाभस्य परमलाभत्वोक्त्या फलमहत्वं तादृशफलस्य विद्यैकलभ्यत्वं च पूर्वार्धेन प्रदर्शितम् । ननु प्रत्यग्रूपस्याद्वितीयात्मनः प्राप्तौ कथं विद्या साधनम् । तस्य पूर्वमेव सिद्धत्वादित्याशंक्य कण्ठगतविस्मृतकनकमयमालाबोधकवाक्यजन्यज्ञानवत् तद्व्यञ्जकत्वेन तदज्ञानतत्प्रयुक्तानर्थजालनिवर्तकत्वेन च साधनत्वं युज्यत इत्युपपादनपूर्वकं एवंभूतब्रह्मविद्या "श्रेयांसि बहुविघ्नानि भवन्ति महतामपि" इति न्यायेन सर्वेषां न सुलभा । किन्तु "ईश्वरानुग्रहादेव पुंसामद्वैतवासना । महाभयकृतत्राणा द्वित्राणामुपजायते" ॥ इति वचनरीत्या सुकृतिनां केषाञ्चिदेवेति कथञ्चिदधिकारिलाभ उत्तरार्धेनोक्तः । "सुकृती पुण्यवान्धन्य" इत्यमरः ॥ ३ ॥

(अ. का.) इदानीं साक्षात् गुरुप्रणामानुस्मरणपूर्वकं चिकीर्षितं सामान्यतः प्रतिजानीते नत्वेति—

(मू.) **नत्वा मार्गसहायवेङ्कटगुहाभिख्याध्वरीन्द्रान् गुरून्**
त्यागाधीशमखीश्वरान् सुमहितान् तत्तातपादानपि ।
श्रीनारायणयोगिवर्यचरणाम्भोजं सदानुस्मरन्
किञ्चित्कौतुकमातनोमि ननु सद्विद्याविलासाभिधम् ॥ ४ ॥

(व्या.) श्रीमार्गसहायवेङ्कटसुब्रह्मण्यदीक्षितान् पितृचरणान् श्रीत्यागराजदीक्षितान् पितामहचरणांश्च प्रणम्य वेदान्तार्थोपदेष्टृश्रीनारायणानन्दसरस्वतीपूज्यपादचरणारविन्दमनुस्मरन्ननु अनुध्यायन्नेव । "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमरोक्तेः । सद्विद्यायाः सद्विद्याख्यब्रह्मविद्यायाः विलासः विशेषाभिव्यक्तिः यस्मात् इति व्यधिकरणबहुव्रीहिः । सद्विद्याविलासः इत्यभिधा नामधेयं यस्य तत् सद्विद्याविलासाभिधम् । किञ्चित् कौतुकहेतुकत्वात् कौतुकं ग्रन्थमित्यर्थः ॥ ४ ॥

(अ. का.) ननु अनेकासु उपनिषत्सु सतीषु किमिति सद्विद्यायामेवादरः क्रियत इति शंकां तद्धेतुप्रदर्शनेन परिहरन् विशिष्य प्रतिजानीते ब्रह्मेति—

(सू.) ब्रह्मात्मैक्याशयस्य स्फुटतरगमकैः षड्विधैः संगतायां
सद्विद्यायां हि खंडाः सितकिरणकलासंख्यया सन्ति वित्ताः ।
तेषां संक्षेप्तुमर्थं विमृदितविमताशंकमालम्ब्य भाष्यं
पद्यैरीहेऽनवद्यैः पटुगुरुचरणानुग्रहस्फीतधैर्यः ॥ ५ ॥

(व्या.) विद्यते ज्ञायतेऽनयेति विद्या "संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः" (पा. सू. ३-३-९९) इति करणे क्यप् । सतो विद्येति षष्ठीतत्पुरुषः । सदाख्यब्रह्मज्ञानसाधनभूतः छान्दोग्योपनिषद्गतषष्ठप्रपाठकः इह सद्विद्येत्यनेन विवक्षितः । तां विशिनष्टि—ब्रह्मात्मेत्यादिना । ब्रह्मणः मायोपाधिकस्य सर्वज्ञत्वादिविशिष्टस्य जगत्कारणस्येश्वरचैतन्यस्य अन्तःकरणोपाधिकस्य कर्तृत्वभोक्तृत्वादिविशिष्टस्य जीवचैतन्यस्य च निष्कृष्टरूपेण यदैक्यं अभेदः महावाक्यप्रतिपाद्यः तत्तात्पर्यलिङ्गैरत्यन्तं स्पष्टैः

" उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥"

इति प्राचीनोक्तरीत्या उपक्रमोपसंहारैकरूप्यादिरूपैः षड्विधैरपि समन्वितायामित्यर्थः । तथा हि । अस्यामुपक्रमे 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्यद्वितीयं ब्रह्म श्रूयते । तदेव चोपसंह्रियते "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि" इति । तथा ऐतदात्म्यमित्यादि नवकृत्वोऽभ्यस्यते 'स य एषोऽणिमा' इत्यंशस्यान्तिमखण्डेनाभ्यासात् ऐतदित्याद्युक्तम् । प्रमाणान्तरानधिगतमद्वितीयब्रह्मात्मतत्त्वं प्रतिपाद्यते । 'आचार्यवान् पुरुषो वेद' 'तस्य तावदेव चिरम्' 'यावन्न विमोक्ष्ये अथ संपत्स्ये' इति च निरतिशयपुरुषार्थावाप्तिब्रह्मज्ञानफलमवगम्यते । "अनेन जीवेनात्मनानुप्रविश्य" "येनाश्रुतं श्रुतम्" इत्यादि ब्रह्मण्यर्थवादश्चोपादीयते । मृल्लोहतप्तपरशुग्रहणदृष्टान्तैः स्वपिति नामनिर्वचनेन सृष्ट्यादिभिश्च ब्रह्मात्मैक्यमुपपाद्यते । यद्यपि तैत्तिरीयके "सत्यं ज्ञानमनन्तं ब्रह्म" "स यश्चायं पुरुषे यश्चासावादित्ये स एकः" इत्युपक्रमोपसंहारयोः प्रत्यगद्वितीयं ब्रह्मावगम्यते । "सच्च त्यच्चाभवत्" इत्यादिना च तदभ्यस्यते । अपूर्वं च तत्प्रतिपाद्यते । "सर्वान् कामान् समश्नुत" इति तज्ज्ञानफलं श्रूयते । सृष्टिश्रुतयश्चाद्वितीयं ब्रह्म प्रति अर्थवादभूता दृश्यन्ते ।

तथा कोशोपन्यासमुखेन ब्रह्मात्मैकत्वमुपपाद्यते इति षड्विधलिङ्गान्युपपाद्यन्ते । एवमुपनिषदन्तरेष्वपि । तथापि तानि सद्विद्यायामिव न स्फुटतराणीति स्फुटतराद्वैततात्पर्यलिङ्गसङ्गतिरस्यामेवेति भावः । अनेन विशेषणेनादरहेतुप्रदर्शकेन प्रागुक्तशंका परिहृता । तत्र षोडशसंख्याका प्रसिद्धाः खण्डाः ये सन्ति तेषामर्थं प्रतिपाद्यं शब्दतोऽर्थतश्च निरवद्यैः पद्यैः संक्षेप्तुं संगृह्य बोधयितुमीहे प्रयते । ननु स्वमनीषिकोत्प्रेक्षितार्थसंक्षेपरूपत्वे ग्रन्थोऽयं अनुपादेयः स्यात् इत्याशंकावारणायाह भाष्यमालम्ब्येति । भाष्यं च श्रीशंकरभगवत्पादाचार्यकृतमेव नान्यत् । प्रसिद्धतरत्वात् । ब्रह्मात्मैक्याशयस्येत्याद्युपक्रमप्रतीतार्थानुकूलत्वाच्च । तर्हि भाष्येणैव गतार्थत्वात् अलं भवदीयग्रन्थेन इत्यत आह विमृदितविमताशंकमिति । विमतानां विरुद्धमतस्थानां विशिष्टाद्वैतिनां द्वैतिनां च या ईषत् शङ्काः मंदाशंकाः ताः विमृदिताः यस्मिन् कर्मणि इति प्रधानक्रियाविशेषणमिदम् । तथाचार्वाचीनकुदृष्टिकृतदुश्शंकापंकक्षालनेन भाष्योक्तार्थस्यैव सम्यगावेदनान्नायं यत्नो विफल इति हृदयम् । ननु अतिगम्भीरोपनिषद्वाक्यभाववर्णनं भाष्ये कृतमपि भवादृशैर्न सम्यग्वेदितुं शक्यम् । नतरां तदुपरि परोक्तदोषाः । नतमां च तद्विमर्दनम् इत्याशङ्कायामाह पटुविति । श्रीगुरूणामनुग्रहस्य पटुत्वं निखिलानर्थनिवृत्तिपूर्वकसकलश्रेयःप्रापणसामर्थ्यम् । तथा चैवंविधगुर्वनुग्रहबलात् विवक्षितविषयसम्यग्वेदनं मादृशानामपि संभवतीति प्रवृद्धधीरभावस्सन् ईहे इति पूर्वेणान्वय इति भावः ॥ ५ ॥

॥ इत्युपोद्घातः ॥

(अ. का.) इत्थं शिष्याणां एतद्ग्रन्थशुश्रूषारूपावधानसिद्धये विशिष्य प्रतिज्ञा कृता । अन्यथा विशिष्य एतद्ग्रन्थप्रतिपिपादयिषार्थाज्ञाने तद्बुभुत्सूनां तद्बोधकैतद्ग्रन्थश्रवणेच्छाया अप्रसक्तेः ॥ अथेदानीं प्रथमखण्डार्थं एकेन श्लोकेन संगृह्णाति स्वेनेत्यादिना—

(मू.) **स्वेनाज्ञप्तं गुरोः प्रागुपसदनवशात्सर्ववेदानधीत्या-**
नूचानंमन्यमाप्तस्वगृहमिति मुनिः श्वेतकेतुं पिताख्यत् ।
आदेश्यं किन्वपृच्छो जगदिदमखिलं येन बुद्धेन बुद्धं
मृल्लोहाद्यैरिवैषां विकृतय इव नेत्यर्थितस्सोऽमुनाह ॥ ६ ॥

(व्या.) मुनिः मननशीलः । "मनेरुच्च" (पा. उ. सू. ५६२) इत्युणादिसूत्रेण मनधातोः इन्प्रत्यये उपधाया उत्वे च मुनिशब्दनिष्पत्तेः । मननं चात्र श्रुतार्थस्योपपत्तिभिरनुचिन्तनम् । यद्वा मुनिः ध्यानपरः, । "बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः" इति बृहदारण्यके तत्र तत्प्रयोगदर्शनात्, "मुनीनामप्यहं व्यास" इत्यादौ ध्याननिष्ठे मुनिशब्दस्य लोकेऽपि प्रयोगाच्च । आवृत्यार्थद्वयमप्यत्र विवक्षितम् । एवं च मनननिदिध्यासनोक्त्या श्रवणस्याक्षेपेण च श्रवणमननध्यानपरिनिष्पन्नब्रह्मसाक्षात्कारवत्वं लब्धम् । सामग्र्याः फलोत्पत्तिनियतत्वात् । अनेन विशेषणेन "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिश्श्रोत्रियं ब्रह्मनिष्ठम्" इत्यादि श्रुतिसिद्धब्रह्मनिष्ठतारूपाचार्यगुणसंपद्दर्शिता । पिता उद्दालकऋषिः । "उद्दालको हारुणिश्श्वेतकेतुम्" इति (श्रुतादुपरिभागे) श्रवणात् । श्रुत्वेति श्रीमदुद्दालकमुनिमुखत इत्यत्रापि वक्ष्यमाणत्वाच्च । इति वक्ष्यमाणप्रकारेण श्वेतकेतुनामानं पुत्रमाख्यत् अवोचत् आङ्पूर्वकात् 'चक्षिङ् व्यक्तायां वाची' त्यस्मात् 'चक्षिङः ख्याञिति' (पा. सू. २-४-५४) कृतख्याञादेशात् लुङि 'अस्यतिवक्तिख्यातिभ्योऽङ्' (पा. सू. ३-१-५२) इति च्लेः अङादेशे 'आतो लोप इटि च' (पा. सू. ६-४-६४) इत्याल्लोपे च सति रूपम् । श्वेतकेतुं विशिनष्टि स्वेनेत्यादिना । स्वेनाऽऽत्मना । पिता स्वपदार्थः । प्राक्प्रथमं आज्ञप्तं, "श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवति' इत्येवं रूपेणाज्ञापितं "आज्ञप्तं किल कामदेवधरणीपालेन काले शुभे" इत्यादाविव आङ्पूर्वकात् "ज्ञप मिच्च" इत्यस्मात् चुरादिण्यन्तात् कर्मणि क्तप्रत्यये "वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः" (पा. सू. ७-२-२७) इति वैकल्पिकेडभावे च रूपसिद्धिः ॥ अत्र भाष्यम् 'पिता योग्यं विद्याभाजनं मन्वानस्तस्योपनयनकालात्ययं च पश्यन्नुवाच । हे श्वेतकेतो अनुरूपं गुरुं कुलस्य नो गत्वा वस ब्रह्मचर्यम् । न वै युक्तं तद्यदस्मत्कुलीनोऽननूच्यानधीत्य ब्रह्मबन्धुरिव भवतीति । ब्राह्मणान् बन्धून् व्यपदिशति न स्वयं ब्राह्मणवृत्त इति । तस्यात् प्रवासोऽनुमीयते पितुः । येन स्वयं गुणवान् सन् पुत्रं नोपनेष्यतीति अत्र पितुरेवोपनेतृत्वस्य मुख्यत्वेन स्मरणादाचार्यान्तरं प्रति प्रेषणमयुक्तमित्याशङ्क्य तस्य पितुः एतद्देशात्प्रवास इत्याद्युक्तम् । तर्हि प्रवासानन्तरं पुनरागत्य स्वयमेवाध्यापयितुं युक्तमित्याशङ्क्य उपनयनकालात्ययं

च पश्यन्निति प्राक् पितुर्विशेषणं कृतम् 'अष्टमे वर्षे ब्राह्मणमुपनयेत् तस्याषोडशात् अनतीतः कालः "आषोडशात् ब्राह्मणस्यापतिता सावित्री" इत्यादिस्मृत्युक्तगौणकालस्यापि पुनरागमनेऽतिक्रमं पश्यन्निति तदर्थः । "स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षस्सर्वान्वेदानधीत्य" इति द्वादशवर्षस्यैव सतः गुरुकुलं प्रति गमनोक्त्या ततः पूर्वकालेऽप्यनुपनयने प्रवास एव हेतुरनुमेयः । अनुरूपं नः ब्राह्मणानां कुलस्येति गुरुविशेषणेन हीनाचार्योपसर्पणव्यावृत्तिः ॥ "प्रतिलोमं वै तद्यत् ब्राह्मणः क्षत्रियमुपेयात् ब्रह्म मे वक्ष्यति" इति श्रुत्या तस्य प्रतिलोमत्वेन निन्दितत्वात् ॥

ब्रह्मचर्यं वसेत्यत्र वसतेरकर्मकत्वात् ब्रह्मचर्यमिति क्रियाविशेषणम् । ब्रह्म वेदः तदध्ययनार्थं व्रतमपि ब्रह्म तत् चर्यमनुष्ठेयं यस्मिन् कर्मणि तद्यथा भवति तथा वसेत्यर्थः । "गदमदचरयमश्चानुपसर्गे" (पा. सू. ३-१-१००) इति चरतेः कर्मणि यत्प्रत्ययः । अथवा ब्रह्मणोक्तव्रतस्य चर्या यस्मिन् कर्मणीति तृ धातुलोपसूत्रस्थधातुलोपशब्दवत् व्यधिकरणबहुव्रीहिः । चर्याशब्दः भावप्रत्ययान्तः । न च "कृञः श च" (पा. सू. ३-३-१००) इत्यत्रत्येन "परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम्" इति वार्तिकेन परिपूर्वात् चरतेः भावे शप्रत्यये "सार्वधातुके यक्" (पा. सू. ३-१-६७) इति यकि च परिचर्याशब्दनिष्पत्तावपि केवलचर्याशब्दः कथमिति वाच्यम् ॥ 'चर्या त्वीर्यापथे स्थितिः' इति कोशात् 'समस्ततपश्चर्याजातानां आश्चर्याणां" इत्यादिमहाकविप्रयोगाच्च तत्साधुत्वस्य कथंचित् वैयाकरणैरुपपादनात् । भट्टभास्कराचार्यास्तु यजुर्वेदभाष्ये "सनाभानेदिष्ठं ब्रह्मचर्यं वसन्तं" इत्यत्र ब्रह्म वेदः तदर्थानां व्रतानां चरणं ब्रह्मचर्यं 'गदमदचरेति' (पा. सू. ३-१-१००) यत् । तदुपसंप्राप्य वसन्तं, यद्वा ब्रह्मचर्यं निषेव्यमाणं इति व्याचख्युः । प्रथमकल्पे उपसंप्राप्येत्यध्याहारः द्वितीये तु वसतेर्लक्षणा स्यादिति तद्रीतिरिह नादृता । तेषां तदाश्रयणं तु ब्रह्मचर्यपदे चकाराकारोदात्तत्वस्य कृदुत्तरपदप्रकृतिस्वरस्य अनुरोधेन । बहुव्रीह्याश्रयणे पूर्वपदप्रकृतिस्वरप्रसङ्गेन तदसङ्गतिरिति बोध्यम् । अत्र तु स्वरानुत्पत्तिशंका नोदेति एकश्रुत्या पाठादिति दिक् ।

प्रागित्यस्य प्रथममित्यर्थो मास्तु पाठेनैव क्रमलाभात् । किन्तु

" द्वौ दैवे प्राक् त्रयः पित्र्ये उदगेकैकमेव वा ।
मातामहानामप्येवं तन्त्रं वा वैश्वदैविकम् ॥ "

इति याज्ञवल्क्यस्मृताविव प्राङ्मुखमित्यर्थः । तच्चाध्ययनक्रियाविशेषणं "प्राङ्मुखो दक्षिणतश्शिष्य उदङ्मुखो वेति गौतमस्मृत्या प्राङ्मुखस्य सतोऽध्ययनविधानात् ।

अस्मत्कुलीनो ब्रह्मबन्धुरिव न भवतीति वक्तुमयुक्तं जन्मान्तरकर्मवशात् तथाविधस्यापि कस्यचित्संभवादित्याशंक्य युक्तपदमध्याहृत्य तद्युक्तत्वनिषेधपरतया श्रुतिर्भाषिता न वै युक्तं तदिति । एवं पितृवचनगौरवात् अनुरूपं गुरुमासाद्य अधीहि भो इत्युपसीदेत्तस्मा अन्वाहृपाणिना "सव्यमुपसंगृह्यानंगुष्ठमधीहि भो इत्यामंत्रयेत गुरुम्" इत्यादिशास्त्रोक्तोपसदनादिक्रमात् । 'विभाषा गुणेऽस्त्रियाम्' (पा. सू. २-३-२५) इति हेतौ पञ्चमी । तस्माद्गुरोः "आख्यातोपयोगे" (पा. सू. १-४-२९) इति सूत्रेण नियमपूर्वकविद्यास्वीकारे वक्तुरपादानसंज्ञाविधानात् पञ्चमी ।

सर्वे वेदाः तान् । "पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन" (पा. सू. २-१-४९) इति कर्मधारयः । अत्र वेदानिति बहुवचनेनैव सर्ववेदलाभसंभवे सर्वविशेषणं, किमर्थमित्याशंक्य कपिञ्जलाधिकरणन्यायेन (जै. न्या. ११-१-८) बहुवचनस्य त्रित्वपर्यवसाने सति अनूचानमानित्वानुपपत्तेः चतुर्णां वेदानां लाभाय तदित्याशयेन 'सर्वान्वेदान् चतुरोऽपि अधीत्य तदर्थं च बुध्वे'ति भाष्यम् । 'स्वाध्यायोऽध्येतव्य इति अध्ययनविधेः स्वाधीनोच्चारणक्षमत्वलक्षणाक्षरावाप्तिफलकत्वस्यैव सिद्धान्तसिद्धत्वेऽपि पूर्वमीमांसकरीत्या अर्थावबोधपर्यन्तत्वमङ्गीकृत्य अधीत्येत्यनेन स्वरसतो गुरुमुखोच्चारणानूच्चारणेनावाप्येत्यर्थस्यैव प्रतीतावपि तदर्थं च बुध्वेति अधिकार्थविवरणमपि अनूचानमानित्वोपपादनार्थमेव । अर्थज्ञानाभावे तदनुपपत्तेः । अनूचानमात्मानं मन्यत इत्येवं शीलमनूचानमन्यं 'आत्ममाने खश्च' (पा. सू. ३-२-८३) इति सूत्रेण स्वकर्मके मनने वर्तमानात् मन्यतेस्सुबन्ते उपपदे खशश्चकारेण णिनेश्च विधानात् श्रुतिस्थणिनिप्रत्ययान्तपदस्य खशन्तपदेनेह विवरणं कृतम् । तथाभूतं सन्तं आप्तस्वगृहं आप्ताः स्वगृहा येनेति बहुव्रीहिः, एयायेत्यत्र गृहानिति भाष्ये दर्शनात् । अत्राप्ति-

क्रियासमानकर्तृकत्वमादाय अधीत्येति ल्यप उपपत्तिः । अनूचानमानित्वोक्त्या अर्थात् अप्रणतस्वभावत्वरूपस्तब्धत्वस्यात्मोत्कृष्टत्वबुद्धिरूपमहामनस्त्वस्य च लाभान्न तयोः पृथगुक्तिः ।

पिता किमित्याख्यत् तदाह—आदेश्यमित्यादिना इवेत्यन्तेन । अत्र इदमिति पदाध्याहारेण इदं किंनु इति वाक्यभेदेन व्याख्येयम् । अनेन परिदृश्यमानप्रकारेण स्तब्धत्वं तव गर्हितं नु "विद्याविनयसम्पन्ने ब्राह्मणे" इत्यादौ विनयस्य ब्राह्मणधर्मत्वोक्तेरिति । 'श्वेतकेतो यन्नु सोम्येदं महामना' इत्यादिश्रुत्यर्थः संगृहीतः ।। आदेश्यं शास्त्राचार्योपदेशगम्यं तमात्मानमपि अपृच्छः पृष्टवानसि किं त्वं आचार्यं, उत्तरत्र येनेति ग्रहणात् तमित्यत्र लभ्यते । उतेत्यर्थबोधकमपीतिपदं पूरणीयम् । एतावता 'उत तमादेशं अप्राक्ष्यः' इति श्रुतिभागो विवृतः ।। "अकर्तरि च कारके संज्ञायाम्" (पा. सू. ३-३-१९) इति विहितस्य घञः कर्मार्थकत्वात् तदर्थकण्यत्प्रत्ययान्तपदेन आदेशपदस्य छान्दस्या प्रक्रियया निष्पन्नस्य अप्राक्ष्य इति पदस्य अपृच्छ इत्यनेन च विवरितुं युक्तत्वात् । इत्थं पृष्टवतोऽस्यायमाशयः यद्युपाध्यायादनितरसाधारणः कोऽपि अतिशयविशेषस्त्वया प्राप्तः स्यात् तदा अयुक्तमपि इदं स्तब्धत्वादिकं तव कथंचित् संभवेदपि नाम । तादृशश्चातिशयः ब्रह्मविद्यालाभरूप एव नान्यः ।। स च न गुरूपदेशेन विना । सोऽपि च "नापृष्टः कस्यचिद्ब्रूयान्न चान्यायेन पृच्छतः" "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया" इत्यादिशास्त्रानुसारेण यथावत् प्रश्नमूलकः इति ।

यत्तु भाष्ये "येन वा परं ब्रह्मादिश्यते स आदेश इति करणघञन्ततया शास्त्रपरोऽयमादेशशब्द इति पक्षान्तरमुक्तम् तत्र येनाश्रुतमित्यादिविशेषणानुपपत्तिः । न हि ब्रह्मप्रतिपादकब्राह्मणाख्यग्रन्थश्रवणादिमात्रेण सर्वमन्यत् श्रुतमित्यादिकं युज्यते तदर्थब्रह्मश्रवणादिद्वारा तु तद्योजयितव्यमिति कियानिव क्लेश इति प्रथमव्याख्यानमेवात्राद्दृतम् । आदेश्यमित्यादेरुक्तपक्षोपलक्षकत्वं वास्तु । तमादेशं विशिनष्टि जगदिति । येन बुद्धेन ज्ञातेन अन्यत् अबुद्धमखिलमपीदं जगत् बुद्धं भवतीत्यर्थः । सर्वविषयकज्ञानप्रयोजकज्ञानविषयत्वरूपादेशविशेषणपरश्रुतौ येनाश्रुतमित्यादौ श्रुतेन मतेन विज्ञातेनेति पूरणीय-

पदत्रयस्यार्थः श्रुतिमतिविज्ञातिसाधारणरूपावच्छिन्नबोधकतृतीयान्तबुद्धपदेन संगृहीतः। तथा तादृशप्रथमान्ततत्पदेन श्रुतं मतं विज्ञातं भवतीति श्रूयमाणपदत्रयस्यार्थः 'अश्रुतमपि अन्यत् श्रुतं भवति अतर्कितमपीत्यादि' भाष्यात्। श्रुताश्रुतसाधारणवस्तुमात्ररूपोद्देश्यपरस्याश्रुतममतमित्यादेरर्थस्तु जगदिदमखिलमित्यनेन व्याख्यातः। एतेनादेशविशेषणेन ब्रह्मज्ञानात् सर्वज्ञानोक्त्या ज्ञातव्यान्तराभावेन कृतार्थत्वप्रतीतेः ततः पूर्वं सर्वानपि वेदानावीत्य सर्वश्चान्यद्वेद्यमधिगम्यापि अकृतार्थ एव पुरुष इति सूचितम्।

अन्यविज्ञानेन कथमन्यद्विज्ञातं भवतीति मन्वानस्य श्वेतकेतोः कथन्नु भगव इत्यादिप्रश्नस्यार्थस्तु उत्तरेणैवार्थात् सिद्ध इति नोक्तः। "यथा सौम्यैकेन मृत्पिण्डेन" "यथा सोम्यैकेन लोहमणिना" "यथा सोम्येकेन नखनिकृन्तनेन" इति दृष्टान्तवाक्यत्रयार्थस्संगृहीतः मृदित्यादिना। मृत् मृत्तिका, लोहः सुवर्णम्, अयः कृष्णायसम् एतैः बुद्धैः एषां मृत्सुवर्णकृष्णायसानां विकृतयः विकाराः कार्याणि घटशरावोदञ्चनकटकमकुटकेयूरखनित्रकुद्दाललवित्रादिरूपाणि यथा बुद्धानि भवन्ति एवमित्यर्थः। बुद्धेनेति तृतीयान्तस्य बहुवचनान्ततया विपरिणतस्य बुद्धमिति प्रथमान्तस्य च स्त्रीलिंगे बहुवचनान्ततया विपरिणतस्येहानुषङ्गात्। इह प्रथमदृष्टान्ते घटशरावादिकारणभूतं मृण्मात्रं ग्राह्यं, न तु पिण्डः, तस्य तद्रूपेण कारणत्वाभावात्। तथा द्वितीयतृतीयदृष्टान्तयोः लोहमणिनखनिकृन्तनशब्दाभ्यां विकारवाचिभ्यां लक्षणया तद्गतकारणांश एव ग्राह्य इत्यभिप्रेत्य मृल्लोहायोभिरित्युक्तम्। अत एव मृत्तिकेत्येव सत्यं लोहमित्येव सत्यं कृष्णायसमित्येव सत्यमिति मृत्तिकालोहकृष्णायसशब्दैः प्रत्यवमर्शः मृत्पिण्डलोहमणिनखनिकृन्तनशब्दोपात्तोपादानानां पिण्डाद्यवस्थाया अप्यसत्यत्वज्ञापनाय श्रुतावेव कृतः। "अनोऽश्मायस्सरसां जातिसंज्ञयोः" (पा. सू. ५-४-९४) इति सूत्रविहितटच्प्रत्ययान्तकृष्णायसशब्दार्थः इह अयश्शब्देनोक्तः, सामान्यशब्दस्य विशेषपर्यवसानसंभवात्॥ बहुदृष्टान्तोपादानन्तु तेषु भूयोदर्शनद्वारा यद्यत् कार्यं तत्तत्कारणज्ञानात् ज्ञातमिति व्याप्तिग्रहदार्ढ्यसिद्ध्ये कृतम्।

अत्रायमभिप्रायः॥ यदि तार्किकमत इव कार्योपादानयोः भेदस्स्वीक्रियते, तदा कारणेन ज्ञातेनापि कार्यं न ज्ञेयं, न हि घटज्ञानात् पटज्ञानं

भवतीति शङ्कावकाशं लभेत, न तु वेदान्तसिद्धान्ते तयोर्भेदस्स्वीक्रियते, किन्तु कारणमेव कार्यात्मनाऽवतिष्ठत इति कारणस्यैवावस्थितिरिति भेदः। न च कार्यकारणयोरभेदे मृत् कारणं घटादिकं कार्यम् इति व्यवहारो न स्यादिति वाच्यम्। "वाचारंभणं विकारो नामधेयम्" इति श्रौतपदत्रयेणोक्त—शङ्कापरिहारात्। योऽयं मृदादिव्यतिरिक्त इवावभासमानो घटशरावोदञ्चनादिरूपो विकारस्स सर्वोऽपि वाचारम्भणम्। आरभ्यत इत्यारम्भणम्, 'राजभोजनाश्शालयः' इतिवत् बाहुलकात् कर्मणि ल्युट्, वाचाया आरम्भणमिति षष्ठी समासः। लिङ्गसामान्यविवक्षायां नपुंसकनिर्देशः, वाचा केवलमारभ्यत इत्यर्थः। ननु मृदादिभिरारम्भणीयो विकारः कथं वाचारम्य इति शङ्कायां, वाचारम्भणमित्यस्याभिप्रायं स्फुटयति नामधेयमिति। नामधेयमात्रं विकारः, न तु धर्मतोऽस्तीत्यर्थः॥ लोकेऽपि ह्यर्थासत्वविवक्षायां नाममात्रमेतदित्युच्यते॥ यद्यपि श्रुतौ मात्रपदं नास्ति, तथापि नामधेयवाच्यस्य विकारस्य नामधेयत्वोक्त्या तदर्थो लभ्यत इति तादृशश्रुत्याशयात्। न च तर्हि विकारस्यासत्वे सन् घट इति प्रत्ययो न स्यादिति वाच्यम्। मृत्तिकेत्येव सत्यमित्यनया मृदादिरेव सत्यं तदव्यतिरिक्ततया भासमानघटशरावादिनामविशेषगोचरस्तदर्थक्रियाविशेषकारी च विकारस्त्वसत्योऽपि रज्जुसर्पवत् अनिर्वचनीयो मायामयोऽवभासत इत्यर्थिकयापत्तिपरिहारात्।

ननु एवमपि नैयायिकरीत्या मृदादिभिन्नं तदारब्धघटादिद्रव्यान्तरं सत्यमङ्गीकृतं चेत्, बाधिका युक्तिः केतिचेन्न॥ कारणगुणप्रक्रमेण तस्य गुरुत्वान्तराधिकरणतया गुरुत्वद्वैगुण्योपलब्धिप्रसङ्गात्। तस्मात् मृद्व्यतिरेकेण घटादिरूपं द्रव्यान्तरं तत्वतो नास्तीति युक्तितोऽपि सिद्धेः। मृज्ज्ञानेन घटादिज्ञानवत् सद्विज्ञानेनापि सर्वविज्ञानमुपपद्यत इति। परं तु "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुतिभागार्थः अस्मिन् श्लोके न संगृहीतः॥ "आद्ये खण्डे यदुक्तं विकृतिरिह वचोगोचरो नाममात्रं सत्योपादानतायुङ् मृत्" इति चतुर्थखण्डार्थसङ्ग्रहश्लोके तदर्थस्यानुवदिष्यमाणतया पुनरुक्तिप्रसङ्गात्। तत्र विकृतिः घटशरावादिरूपो विकारः इह लोके वचोगोचरः वाङ्मात्रविषयः वाचा केवलमारभ्यत इत्यर्थः। तदाशयस्फुटीकरणाय नाममात्रमिति श्रुतौ मात्रपदाभावेऽपि पूर्वोक्तरीत्या तदर्थलाभादिह मात्रपदमुक्तम्।

उपादानत्वयोगिनी मृत्तु सत्येत्येतदाद्यखण्डे उक्तमिति अनुवादस्य स्फुटत्वात् । अत्र च वाचारम्भणं वागालम्बनं इति भाष्यस्वारस्यमनुसृत्य वचोगोचर इति तदर्थसंग्रहः श्रुत्यक्षरानुसारी । न्यायरक्षामणिमनुसृत्य तु व्याख्यात इति बोध्यम् ।

ननु मृत्तिकायास्सत्यत्वोक्तिः कथं घटतां तस्या अपि विकारत्वेन घटादिवदसत्यत्वादिति चेत् । सत्यं, अत एव श्रुताविति पदं सत्यमिति नपुंसकपदं च प्रयुक्तम् । तेन इति शब्दस्य प्रकारवाचित्वात् मृत्तिकाप्रकारवत् सत्यमित्यर्थो लभ्यते । मृत्तिकाप्रकारश्च उपादानत्वमिति मृत्तिकाप्रकारवन्मूलकारणमेव सत्यमिति रीत्या मूलकारणसत्तैव सर्वविकारेष्वपि प्रतीयत इत्याशयात् । श्रुताविति शब्दार्थभूतः प्रकारः उपादानत्वरूप इति द्योतनायैव सत्या मृत् इत्येतावन्मात्रमनुक्त्वा उपादानतायुगिति मृद्विशेषणं श्लोके कृतम् ।

नन्वेवमपि कार्यस्य परमार्थतः कारणव्यतिरेकेणाभावेऽपि अनिर्वचनीयस्य तस्य सत्वात्कथं कारणज्ञानेन कार्यज्ञानमिति चेन्न । वस्तुतत्वज्ञानमेव हि वस्तुज्ञानं आरोपितरजतादिरूपेण ज्ञातेऽपि शुक्तिकादौ शुक्तिकाऽज्ञानादिति व्यवहारदर्शनात् । वस्तुनश्च तत्वमुपादानमेवेति तद्विज्ञाने सर्वविकारजातं ज्ञातमेवेत्यभिप्रायात् । एतेन वाचारम्भणमित्युक्ते मिथ्येत्यश्रुतकल्पनं पुनरुक्तिर्नामधेयमितीत्यस्य निरर्थकतेति पराभियुक्तवचनोक्तदूषणानि प्रत्युक्तानि, इतिशब्दार्थवत्तायाः उक्तत्वात् मिथ्येत्यश्रुतकल्पनस्य चाभात् । श्रुताभ्यामेव वाचारम्भणनामधेय-पदाभ्यां मृत्तिकेत्येव सत्यमिति वाक्यानुगृहीताभ्यां मिथ्यात्वलाभस्योक्तत्वात् । नामधेयमित्यस्य वाचारम्भणशब्दाभिप्रायस्फुटीकरणार्थतया तद्व्याख्यानरूपत्वेन पुनरुक्त्यभावाच्च । दृश्यते हि श्रुतिषु "जायमानः शरीरमभिसंपद्यमानः स उत्क्रामन् म्रियमाणः" "अमुत्रामुष्मिन् लोके" "दैव्याय कर्मणे देवयज्यायै" "गौरावस्कन्दिन्नहल्यायै जार" इत्यादिषु स्वोक्तस्य स्वयमेव व्याख्यानम् ।

अस्मद्वंशावतंसश्रीमद्दीक्षितचरणास्तु न्यायरक्षामणौ मृत्तिकेत्येव सत्यमित्यादिवाक्याभिप्रायमित्थं वर्णयामासुः । "नेमानि वाक्यानि मृदादिसत्यत्वविधित्सया" प्रवृत्तानि । "षड्विंशतिरित्येव ब्रूयात्" इतिवन् एवकारोपहत-

विधिशक्तिकत्वात्। किन्तु तद्विकारसत्यत्वनिषेधविषयाणि। ततश्च यथा षड्विंशतिवाक्यस्य चतुस्त्रिंशन्मन्त्रनिषेध एव तात्पर्यात् षड्विंशतिपदग्रहणे तात्पर्याभावात् षड्विंशतिपदस्थाने तूपरगोमृगयोरश्वस्य च वङ्क्रीणां समस्य संख्यावाचिपदनिवेशनस्य न्यायप्राप्तस्य न प्रतिक्षेपः। एवं 'मृत्तिकेत्येव सत्यं लोहमित्येव सत्यं कृष्णायसमित्येव सत्यं' इतिवाक्यानां विकारसत्यत्वनिषेध एव तात्पर्यवतां मृदादिसत्यत्वविधाने तात्पर्याभावात् घटशरावादिन्यायप्राप्तस्य मृदादीनामसत्यत्वस्य न प्रतिक्षेपः। प्रत्युत मृत्तिकादिशब्दानामितिशब्दशिरस्कत्वेन मृदादीनामसत्यत्वमेव सूच्यते। "मनो ब्रह्मेत्युपासीत" इत्यादिवाक्येषु मनःप्रभृतीनां ब्रह्मभावस्येवेति।

अत्र किञ्चिदिव व्याख्यायते। अस्त्यग्निष्टोमीये पशौ अध्रिगुर्नाम प्रैषः "दैव्याश्शमितार उत मनुष्या आरभध्व" मित्यादिः। पशौ संज्ञपनाय नीयमाने होत्रा प्रयोज्यः तत्र पठ्यते। "षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठ्योच्च्यावयतां" दिति। हे शमितारः अस्य पशोर्वङ्क्रयः पार्श्वास्थीनि एकैकस्मिन् पार्श्वे त्रयोदश त्रयोदशेत्येव षड्विंशतिस्सन्ति ताः वङ्क्रीः अनुष्ठ्या स्थानानुक्रमेण उच्च्यावयतात् उद्धृतेत्यर्थः, अनुक्रमेणानुष्ठानमनुष्ठा, "सुपां सुलुक् पूर्वसवर्णाच्छेयाडाड्यायाजालः" (पा. सू. ७-१-३९) इति सूत्रेण तृतीयाविभक्तेः ड्यादेशः। ऐकादशिनपशुगणे च 'आग्नेयः कृष्णग्रीवस्सारस्वती मेषी बभ्रुस्सौम्यः' इत्यारभ्य 'वारुणः पेत्वः' इत्यन्तेन विहिते चोदकतः प्राप्तोऽयं मन्त्रः किं समवेतार्थत्वाय षड्विंशत्यादिवदभ्यासेन प्रयोक्तव्यः। उताहो सर्वपशुगतवङ्क्रीणां समस्यवचनेन षडशीत्यधिकद्विशतमेषां वङ्क्रय इति संशये चतुर्धा पूर्वपक्षयित्वा समस्यवचनमिति सिद्धान्तितम्। षड्विंशतिरभ्यासेन पशुगणे तत्प्रकृतित्वादिति नवमाध्याये—चतुर्थपादप्रथमाधिकरणे अश्वमेधे च 'अश्वस्तूपरो गोमृगस्ते प्राजापत्याः' इति श्रुताः। तूपरोऽश्रृङ्गः छागः। गोमृगः आरण्यकमृगविशेषः। अश्वस्य च चतुस्त्रिंशद्वङ्क्रयः सन्ति। अस्ति च तत्र मन्त्रः 'चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिस्समेति अच्छिद्रागात्रावयुनाकृणोत' इत्यादिः। षड्विंशतिरस्य वङ्क्रय इति च चोदकतः प्राप्तः। इदं च तत्र श्रूयते न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयात् इति। किमिह षड्विंशतिरित्येव ब्रूयादिति किमिह षड्विंशतिरित्येव

मन्त्रः प्राप्यते न तु चतुस्त्रिंशदिति मन्त्रः उतोभयोर्विकल्पः इति संशये चतुस्त्रिंशदिति मन्त्रः केवलं पठ्यते न तु विधीयते। पाठाद्विकल्पनन्तु षड्विंशतिरित्येव ब्रूयादिति प्रत्यक्षविधिविरोधान्नोन्मेषमर्हति। ततश्च प्रत्यक्षविहितेन षड्विंशतिमन्त्रेण चतुस्त्रिंशन्मन्त्रस्य 'न गिरागिरेति ब्रूयादैरं-कृत्वोद्गेय' मिति प्रत्यक्षविहितेन इरापदेन 'यज्ञायज्ञावो अग्नये गिरागिरा च दक्षसे, इति पाठप्राप्तगिरापदस्येव बाध इति प्रापय्य पाठकल्पितविधेश्चोदकतश्च उभयविकल्पः। इरापदं तावत् प्रत्यक्षविहितत्वात् पाठप्राप्तं गिरापदं बाधते। गिरापदनिषेधस्त्वनुवाद इति स्थितिः। इह तु षड्विंशतिरित्येव ब्रूयादिति न विधिः एव शब्दात्। न ह्यत्र एवशब्दोऽवधारणे व्यर्थत्वात्। किन्तु पुनः तदेव पठतीत्यादिवदुक्तानुकथने। षड्विंशतिरित्येतद्धि चोदकतः प्राप्तं प्रत्यक्षपठितेन चतुस्त्रिंशदित्यनेन बाधितं न चतुस्त्रिंशदिति ब्रूयादिति प्रतिषिद्धे चतुस्त्रिंशदिति मंत्रे निवृत्ते पुनष्षड्विंशतिरित्येतत् चोदकतस्समुन्मिषति। तदेतदनूद्यते 'षड्विंशतिरित्येव ब्रूयात्' इति। तथा च षड्विंशतिरित्यस्य प्रत्यक्षविहितत्वाभावात् चतुस्त्रिंशदित्यस्य पाठाद्विधिकल्पना निराबाधा। न च 'न गिरागिरेति ब्रूयादि' त्यपि प्रतिषेधविधिरस्तु इति शङ्क्या 'ऐरं कृत्वोद्गेयमित्यस्यापि विधायकत्वापत्त्या वाक्यभेदप्रसङ्गात्। न गिरापद— प्रतिषेधमात्रेण इरापदस्य प्राप्तिरस्ति, येन तस्यानुवादत्वं स्यात्। ततश्च प्रत्यक्षविहितेनेरापदेन गिरापदस्य बाधो युक्तः। इह तु न चतुस्त्रिंशदिति ब्रूयादिति प्रत्यक्षस्य प्रतिषेधविधेः प्राकरणिकमन्त्रपाठानुमितविधिवाक्यस्य च प्रत्यक्षत्वोपजीव्यत्वाभ्यां तुल्यबलत्वेन मन्त्रयोः विकल्पं विना निर्वाहायोगादिति सिद्धान्तितम्। अश्वस्य चतुस्त्रिंशत्तावचनात् वैशेषिकमिति तस्यैव द्वितीयाधिकरणे तथा तत्प्रतिषिध्य प्रकृतिर्नियुज्यते। सा चतुस्त्रिंशद्वाच्यत्वादिति तस्यैव तृतीयाधिकरणे चिन्तितं यथा प्राकृतं षड्विंशतिरित्येतदध्रिगुवचनं भवति तदा किं, तूपरगोमृगयोः द्विपञ्चाशदनयोः वङ्क्रय इति समस्यवचनं अश्वे तु षड्विंशतिरश्वस्येत्यूहेनैव, उत त्रयाणामपि अश्वतूपरगोमृगाणां षडशीतिरेषां वङ्क्रय इति समस्यैवेति संशये, प्रथम एव पक्षो न्याय्यः। अश्वे षड्विंशतिरित्येव ब्रूयादिति विशिष्य वचनात्। ऐन्द्रिन्यायेन चतुस्त्रिंशतोपि षड्विंशतिशब्देन लक्षणया प्रतिपादनसंभवात्। तस्मात् त्रयाणां न षड्विंशतिरेषामिति समस्य

वचनमिति प्राप्ते 'चतुस्त्रिंशद्वाजिन' इति मन्त्रवचनं प्रतिषिध्य प्रकृतितः प्राप्तं षड्विंशतिरस्येत्यदध्रिगुवचनमनूद्यते। न तु तदपि विधीयते। अनेकार्थविधौ वाक्यभेदप्रसङ्गात्। एवकारोपबलाच्चेत्युक्तमेव। ततश्च षड्विंशतिपदस्यात्र वाचनिकत्वाभावेन ऐन्द्रिन्यायानवतारात्। अनुवादे षड्विंशतिशब्देन तत्संयुक्तम् षड्विंशतिरस्य वङ्क्रय इति वाक्यं प्रकृतिप्राप्तं ब्रूयादिति प्रतीतेः। प्रकृतौ च कार्त्स्न्यसमवेतपशुवङ्क्रीयत्ताप्रकाशकत्वस्थितेः। इह कर्मसमवेतसमस्तवङ्क्रीयत्तां प्रकाशयितुं षडशीतिरेषां वङ्क्रय इति त्रयाणां समस्यैव वचनमिति सिद्धान्त इति, तदेतदधिकरण[1]त्रयमत्रानुसंधेयम्। षड्विंशतिवाक्यस्यानुवादत्वेन षड्विंशतिपदग्रहणे तात्पर्याभावस्य द्वितीयेनेव प्रथमतृतीयाभ्यां सामान्यतो विशेषतश्च तत्पदस्थाने तूपरगोमृगयोः अश्वस्य च वङ्क्रीणां समसंख्यावाचिषडशीतिपदनिवेशस्य ज्ञातव्यत्वेन, तत्त्रितयस्यापि प्रकृतोपयोगादिति। अयञ्चापरस्तत्रोक्तो विशेषः। दृष्टान्तेषु उपादानातिरिक्तविकारसत्यत्वाभावप्रतिपादनस्य दार्ष्टान्तिकेऽपि तथात्वप्रत्यायनार्थत्वात्, तदनुरोधेन "येनाश्रुतं श्रुतं भवत्यमतम्मतमविज्ञातं विज्ञात" मिति वाक्येषु अश्रुतश्रुतादिपदानां योजना। स्थाणुरयं पुमानित्यादिव्यवहारेषु स्थाणुपुरुषादीनामिव बाधायां सामानाधिकरण्यम्। न तु तत्वमस्यादिवाक्येषु इवाभेद इत्यग्निष्टोमाधिकरणन्यायेन विधेयश्रुतमतविज्ञातसद्रूपोपादानब्रह्मात्मकत्वविरुद्धस्याश्रुतामताविज्ञातरूपस्य भूतभौतिकप्रपञ्चस्योपमर्द इति चात्र येनाश्रुतं श्रुतमित्यादौ विरुद्धयोरुद्देश्यविधेययोरन्यतरस्य हानावश्याभ्युपगतव्यायां प्रथमश्रुतत्वात् 'यो होता सोऽध्वर्युरि' त्यत्र होतृपदमिवाश्रुतादिपदं यथाश्रुतमेव स्वीकृत्य श्रुतादिपदमेव गौणन्नेयमिति शंकावारणाय दाशमिकन्यायोपन्यासः। प्रथमश्रुतस्यापि अनुवाद्यस्य तात्पर्यवता विधेयेन विरोधे सत्युपमर्दो युक्त एव, उक्तन्यायात्। तथाहि, "उक्थ्याग्निष्टोमसंयोगादस्तुत, शस्त्रं स्यात् सति हि संस्थान्यत्व" मिति [2]दाशमिकाधिकरणेऽप्यग्निष्टोमे राजन्यस्य गृह्णीयात् व्यावृत्कामो हि राजन्यो यजत इति राजन्ये निमित्तेनोक्थ्याग्निष्टोमयोः कर्तव्यषोडशिगृह्यागाभ्यासः स्तोत्रशस्त्ररहितः स्यात्

---

1 जैमिनीयमीमांशास्त्रे नवमाध्याये चतुर्थपादे प्रथम-द्वितीय-तृतीयाधिकरणत्रयम्।

2 जैमिनीये मीमांसाशास्त्रे-दशमाध्याये, पञ्चमे पादे द्वादशाधिकरणे।

तत्सहितो वेति संशये उक्थ्यस्य अग्निष्टोमस्य च सतष्षोडशीयागाभ्यासविधानात् तदङ्गस्य स्तोत्रस्यानुष्ठाने उक्थ्यस्तोत्रान्तत्वरूपस्योक्थ्यत्वस्य अग्निष्टोमस्तोत्रान्तत्वरूपस्याग्निष्टोमत्वस्य च उपमाप्रसंगात् स्तोत्रशस्त्ररहितस्स्यादिति प्राप्य, षोडशियागाभ्यासविधिना सांगस्य तस्य विधानेन तदंगभूतयोः स्तोत्रशस्त्रयोरनिवार्यत्वात् विधेयेन संस्थान्तरेणानुवाद्ययोरुक्थ्याग्निष्टोमसंस्थयोरुपमर्दो न्याय इति स्तोत्रशस्त्रसहित एव स्यादिति सिद्धान्तितमिति दिक् ।

यत्त्वत्र रामानुजीयैरुक्तं नोक्तश्रुत्या विकारानृतत्वसिद्धिः, तत्र तद्बोधकपदाभावात् । न च मृत्तिकेत्येव सत्यमिति कारणस्वरूपसत्यत्वावधारणान्यथानुपपत्त्या तत्सिद्धिः । मृत्तिकासत्यत्वावधारणस्यैवासिद्धेः ॥ तथा हि सति मृत्तिकैव सत्येति वक्तव्यत्वापत्त्या इतिशब्दवैयर्थ्यस्य क्लीबनिर्देशानुपपत्तेश्च प्रसङ्गात् । किन्तु मृत्पिण्डविज्ञानेन सर्वमृण्मयविज्ञानं कथमित्याकांक्षायां कार्यकारणयोरभेदादित्युच्यते वाचेत्यादिना । अत्र वाचेति वाक्पूर्वको व्यवहारो लक्ष्यते । तस्य च अन्नेन वसतीत्यत्रान्नेनेत्यस्य प्रयोजनतया वासहेतुत्वमिव स्पर्शनक्रियां प्रति प्रयोजनतया हेतुत्वं तृतीयार्थः । आरभ्यत इत्यारम्भणमिति ल्युटि धातुना च स्पर्शो विवक्षितः, सरिरस्य मध्ये इत्यादाविव रलयोरभेदात् । आलभतेश्च "आलम्भः स्पर्शहिंसयोरि" त्यभिधानात् वत्समालभतेति दर्शनाच्च स्पर्शार्थत्वसंप्रतिपत्तेः । विकारो नामधेयमित्युभयोर्विशेषणस्यारम्भणशब्दस्य "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्या" मिति सूत्रेण नपुंसकशेषत्वमेकवचनञ्च योज्यम् । मृत्पिण्डेनेत्यनुषङ्गः । तथा च वाक्पूर्वकहानादिव्यवहारार्थं मृत्पिण्डेन विकारः घटाद्यवस्था घट इत्यादि नामधेयं च दृश्यते । मृत्पिण्ड एव नामरूपभाग्भवतीति न मृदो द्रव्यान्तरं घटादिरिति प्रतिज्ञातेऽर्थे प्रमाणमुच्यते मृत्तिकेत्येव सत्यमिति, मृद्घट इति प्रत्यभिज्ञया घटादिकमपि मृद्द्रव्यत्वेनैव प्रामाणिकमित्यर्थः । शब्दबुद्ध्यादिभेदेऽप्यास्ते शेत इत्यादाविव प्रत्यभिज्ञाया एव द्रव्यैक्यनियामकत्वात् । यदि विकारमृषात्वाभिप्रायेण मृत्तिकेत्येव सत्यमिति व्याख्यायेत तदावधार्यं सत्यत्वं पारमार्थिकसत्यत्वं न भवति मृदि तदनभ्युपगमात् । नापि व्यावहारिकं तस्य घटादावपि सत्वेन अवधारणानुपपत्तेरिति । तदयुक्तम् । मिथ्यात्वलाभप्रकारस्य इतिशब्दार्थवत्वस्य च उक्तत्वात् । द्विगुरेकवचनं (पा. सू. २-४-१) इतिवत् लिंगसामान्यविवक्षया नपुंसकनिर्दे-

शोपपत्तेः। मृत्तिकास्वरूपमेव सत्यमिति स्वरूपावमर्शक इतिशब्दः, अनृतकार्य-प्रतियोगिकं तद्गतं कारणत्वमपि अनृतमिति बोधनार्थं इति स्वीकारेण लिङ्गतत्सार्थक्ययोस्सुतरामुपपत्तेश्च। दार्ष्टान्तिके एवं सोम्य स आदेशो भवतीत्यत्र विवक्षितविशेषोपसंहारपरे 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' इत्यत्र कथं पुनस्सर्वस्य तदात्मत्वमित्याकांक्षायां तत्सत्यं अनृतमितरदिति। स च तस्याधिष्ठानमात्मा सर्पस्येव रज्जुरिति च विकारमृषात्वाभिप्रायस्य स्फुटत्वाच्च। तुल्यसत्ताकत्वेऽपि स्वप्ने शुक्तिकादि सत्, रूप्यादि मृषेति तात्त्विक-सत्यासत्यविभागवन्मृत्सत्यत्वावधारणोपपत्तेः। मृत्तिका हि घटादेः पुरस्तात् पर-स्ताच्च सती मध्येऽपि तथैवेति घटाद्यपेक्षया सत्येति। एवमक्लेशेन वाक्यार्थोप-पत्तौ वाक्शब्दस्य व्यवहारलक्षकत्वं तृतीयायाश्च प्रसिद्धतरार्थत्यागः आरम्भण-शब्दस्य रलाभेदेन स्पर्शार्थकत्वं स्पर्शस्य च मुख्यस्यासम्भवात् अर्थान्तरपर्यवसानं चकाराध्याहारः मृत्पिण्डेनेत्यस्यानुषङ्गः चतुर्थखण्डे तुल्यवदाम्नाते वाचारम्भण-मित्यादौ तृतीयान्तानुषञ्जनीयालाभेन तदध्याहार इत्यादिक्लेशस्याद्वैतविद्वेषमात्र-विजृम्भितत्वादित्यलं प्रसङ्गेन।

एवं वाचारम्भणमित्यादिश्रुत्यर्थस्य सिद्धान्त्यभिमतस्य उत्तरत्र संग्रहीष्य-माणतया अत्रानुक्तिरिति स्थितम्। एवं पित्रोक्ते—अमुना श्वेतकेतुना नेत्युक्त्वा स पिता भगवांस्त्वेव मे तत् ब्रवीत्वित्यभ्यर्थितस्सन्नाह ब्रवीति। 'सदेव सोम्येदमित्यादिना' तत्त्वमुपदेक्ष्यतीत्यर्थः। ब्रूतेः 'वर्तमानसामीप्ये वर्तमानवद्वे' (पा. सू. ३-३-१३४) ति, लटि 'ब्रुवः पञ्चानां आदित आहो ब्रुवः' (पा. सू. ३-४-८४) इत्याहादेशः तिपश्च णलि। अत्र प्रश्नवाक्यस्थस्याप्रच्छ इत्यस्य पुरुष विपरिणामेनानुषङ्गात् नेत्यनेन नापृच्छमित्यर्थो विवक्षितः। यद्यपि, नवै नूनं भगवन्त इति श्रुतौ पूर्वगुरूणामुक्तं तत्त्वज्ञानं नेत्येवोक्तं तथापि भाष्ये अवाच्यमपि गुरोः न्यग्भावमवादीत् पुनर्गुरुकुलं प्रति प्रेषणभयादिति तादृशोत्तर-युक्तत्ववचनात् तत्संग्रहः कृतः। तेषामेतज्ज्ञानमिति पूरणेन वाऽर्थः कार्यः।

(अ. का.) ननु उत तमादेशमिति प्रथमोपक्रमस्थादेशशब्दः सविशेषब्रह्मपर एव। आङ्पूर्वो दिशिर्नियोक्तृप्रयोजनवचनः, उपपूर्वस्तु नियोज्यप्रयोजनवचन इति न्यासकारवचनादत्रादिशेः शासनवाचित्वेन घञन्तस्य तस्य प्रशासित्रर्थकत्वात्।

तथा चादेश्यमित्यनेन तद्विवरणं पूर्वश्लोके कृतमयुक्तमिति मन्यमानानां रामानुजीयानां पक्षं प्रतिक्षिपति ॥ नासावित्यादिना श्लोकचतुष्टयेन—

(सू.) **नासावादेशशब्दस्त्विगुपधकविधौ जाग्रति स्यादजन्तः**
वक्तव्यं पारिशेष्याद्घञिह घटक इत्येवमैच्छन् परेऽपि।
कर्तुर्दृष्टा विवक्षा न हि करणतयाऽन्यश्च कर्ताऽऽथिकस्स्यात्
प्राधान्यं प्रत्ययार्थः खलु भजति ततो नोपचारोऽस्य कल्प्यः ॥७॥

(व्या.) तत्रादेशशब्दस्य कर्तृप्रत्ययान्तत्वे प्रशासितृअर्थकत्वं संभवति, स च प्रत्ययो घञ् न भवति। 'अकर्तरि च कारके संज्ञायाम्' (पा. सू. ३-३-१९) इति कर्तरि घञोऽभावात् घञन्तश्चायमादेशशब्द इति दूषयितुं घञन्ततां प्रत्ययान्तरनिरसनेन परिशिनष्टि नेति श्लोकपूर्वार्धेन। नन्वादिशतीत्यादेश इति कर्तृत्वविवक्षायां "नन्दिगृहिपचादिभ्यो ल्युणिन्यचः" (पा. सू. ३-१-१३४) इति सूत्रेण पचादित्वादच् प्रत्यये "पुगन्तलघूपधस्य च" (पा. सू. ७-३-८६) इति सूत्रेण उपधागुणे च कृदन्तादेशशब्दनिष्पत्तेः तस्य प्रशासितृ वाचित्वं सुलभमेवेति चेत् न। 'इगुपधज्ञाप्रीकिरः कः' (पा. सू. ३-१-१३५) इति सूत्रेण इगुपधत्वे निमित्ते विहितकप्रत्ययस्य, विशेषविहितत्वात् तेनाच्प्रत्ययस्य पचादित्वसामान्याकारेण विहितस्य बाधात्। अत एव वेदे मा न इन्द्राभ्यादिशः सूरो अक्तुष्वा यमन्। त्वा युजा वनेम तत्। इत्यस्यामृचि। भारते च विष्णुनामसहस्रे, 'विदिशो व्यादिशो दिशः' इति कप्रत्ययान्तस्यैव आदिशपदस्य प्रयोगो दृश्यते। आदिश आदेष्टा प्रवृत्तिरोधकस्सूर इति ऋग्वेद भाष्ये, व्यादिशः विशेषेण इन्द्रादीनामादेष्टा इति सहस्रनामभाष्ये च तस्य कर्तरि कप्रत्ययान्तताया: स्फुटत्वात्। न च, इगुपधलक्षणकप्रत्ययस्य पचाद्यच्बाधकत्वे विवदितुमपि युक्तम्, सिद्धान्तकौमुद्यादौ पचादेराकृतिगणत्वादेव सिद्धे केषाञ्चित् पाठः तत्र किमर्थ इत्याशंक्य केषाञ्चिदनुबन्धासंजनार्थः केषाञ्चिद्बाधकबाधनार्थः केषाञ्चित्प्रपञ्चार्थ इति सामान्यतः त्रेधा तत्सार्थक्यमुक्त्वा नदट्—इत्यादावनुबन्धासंजनार्थत्ववत् देवः सेव्य इत्यादौ इगुपधलक्षणकप्रत्ययबाधनार्थत्वस्य कृदादौ कौमुद्यामेवाभिधानात्। ततश्च येषामिगुपधानां दिवुसिवादीनां पचादौ पाठस्तेषां तत्सामर्थ्यात् अचः कप्बाध्यत्वाभावेऽपि अन्येषां दिशिप्रभृतीनां अचः तद्बाध्यत्वमावश्यकमिति

हृदयम् । कप्रत्यये सति 'क्क्ङिति चे' ति, (पा. सू. १-१-५) निषेधेन उपधागुणानुपपत्तेः आदिश इति रूपप्रसङ्गात् अकाररूपकर्तृबोधकप्रत्ययान्तराणामिहासंभवदुक्तिकत्वाच्च परिशेषसिद्धिः । तदितरयावद्विशेषाभाववत्वे सति तत्सामान्यवत्वरूपहेतुः परिशेषः । तथा च प्रयोगः, विवादास्पदं आदेशपदं, घञन्तं, घञितरकाचाद्यकाररूपततत्प्रत्ययाभावकूटवत्वे तादृशाकाररूपप्रत्ययत्वावच्छिन्नाभाववत्वे वा सति अकाररूपप्रत्ययान्तत्वात्, पाकपदवदिति । परिशेष एव पारिशेष्यम् । समानो धर्मः सामान्यं उपमानोपमेयसाधारणो धर्मः इत्यर्थलाभाय 'उपमानानि सामान्यवचनैः' (पा. सू. २-१-५५) इति सूत्रस्थसामान्यशब्द इव 'पारिशेष्यादानन्तर्यमथशब्दार्थः' इति भाष्यादिप्रयोगस्थपारिशेष्यशब्देऽपि उक्तहेतुरूपार्थलाभाय स्वार्थिकष्यञन्ततायाः चतुर्वर्णादित्वेनावश्योपगन्तव्यत्वात् । ततश्चेह आदेशशब्दे घञ् घटक इति वक्तुमर्हमित्यर्थः । 'अर्हे कृत्यतृचश्चे' ति (पा. सू. ३-३-१६९) तव्यस्य अर्हार्थत्वात् । घटकत्वं च, तद्विषयताव्यापकस्वविषयताकत्वरूपं तदन्तर्गतत्वम् । न केवलं वक्तुमर्हमित्येवेष्टं च तथैव परेषामपि तथा च तेषामत्र विषये पूर्वोत्तरपक्षसंग्राहकौ श्लोकौ—

छान्दोग्ये केचिदाहुर्दिशतिरुततमादेशमप्राक्ष्य इत्य-
त्राङ्पूर्वस्तूपदेशं प्रकटयति सतो न प्रशास्ति घञन्तः ।
नो कर्तर्यस्ति कर्मण्यगणि घञिह सत् कर्तृ शास्तौ न कर्म
स्यात्स्यात्कर्मोपदेशे तदिदमुत तमादेशवाचोपदेश्यम् ॥

अत्र ब्रूमः प्रशास्ति वदति दिशिरसावाङ्मुखो नोपदेशं
शास्तौ सोऽतिप्रसिद्धो न हि पर इह चापेक्षितार्थप्रसङ्गः ।
युक्तोऽसाधारणोक्त्या घञगणि करणेऽप्यत्र वैवक्षिकत्वं
शब्दोक्तं कारकाणां ननु करणतया कर्तरि स्याद्विवक्षा ॥

इह हि घञन्ततापक्षमेवाश्रित्य कथंचित् स्वपक्षोपपादनात् कर्तृप्रत्ययान्तरसंभवे, तेनैव तदुपपादनस्य न्याय्यत्वेनोक्तविवक्षाक्लेशायोगाच्च परिशेषः स्फुट एव । तथा च घञन्तस्यादेशपदस्य प्रशासित्रर्थकतया विवरणायोगात् आदेश्यमित्यनेन कर्मणि घञन्ततया तद्विवरणं युक्तमेवेति भावः ।

ननु, उदाहृतशङ्कासमाधानपरश्लोकाभ्यामेव घञन्तस्यापि प्रशासित्रर्थकत्वं समर्थितम्। तथा च कथं तथा विवरणायोगः। तयोर्हि अयमर्थः। केचिदाहुः छान्दोग्ये उत तमादेशमप्राक्ष्य इत्यत्र आङ्पूर्वा दिशतिः सत उपदेशं प्रकटयति। न प्रशास्ति, कुतो, घञन्तशब्दः न कर्तर्यस्ति। किन्तु कर्मणि घञगणि विहितः। अस्तु को दोष इति चेत्, शास्तौ कर्तृ स्यात् न कर्म, उपदेशे तु कर्म स्यात् तदित्युपसंहारः। तस्मादुत तमादेशमिति वाचोपदेश्यमेवोक्तमिति [1]प्रथमस्य। आङ्मुखो दिशिः शास्तावतिप्रसिद्धः। न हि परेऽन्यस्मिन्नुपदेशे। अत्र "पूर्वादिभ्यो नवभ्यो वा" (पा. सू. ७-१-१६) इति वैकल्पिकस्स्मिन्नभावः। किञ्च साधारणस्य प्रशासितृत्वस्योक्त्या इहापेक्षितार्थप्रसङ्गो युक्तः। प्रशासितृत्वं हि ब्रह्मणोऽसाधारणं नोपदेश्यत्वम्। तस्य मुक्तितदुपायब्रह्मसाधारण्यात्। असाधारणधर्मश्च व्यावर्तको भवति। अपि च एकविज्ञानेन सर्वविज्ञानप्रतिज्ञापेक्षितं शासितृत्वं नेतरत्, सति निमित्तान्तरे तत्प्रतिज्ञानुपपत्तेः। शासितृत्वेन च तस्यैव निमित्तत्वे तत्प्रतिज्ञोपपद्यते। तथा च, अपेक्षितानपेक्षितयोरपेक्षितविधानं युक्तम्। अत एव नवमे "पत्नीसंयाजान्तत्वं सर्वेषामविशेषात्", (जै अ. ९-पा. १ अधि. ९) इत्यधिकरणे पत्नीसंयाजान्तानि अहानि संतिष्ठन्ते इति द्वादशाहे श्रुतम्। पत्नीसंयाजान्ते समापनं किं सर्वेषामह्नां, उत उत्तमवर्जमिति संशये, अविशेषात् सर्वेषां पत्नीसंयाजान्तता। असंस्थितो हि तर्हि यज्ञः इति वचनं तु त्रिरसंस्थानिमित्तं गौणमिति पूर्वपक्षयित्वा 'द्वादशाहे न प्रैव जायते' इति सहकर्तव्यत्वेन श्रुतानां द्वादशानां यागानां युगपदनुष्ठानासंभवेन सर्वं हि कस्मिंश्चित् पदार्थ एव स्थाप्य अपरमुपक्रमितव्यमिति तत्र तत्र पूर्वमहः कस्मिन् पदार्थे अवस्थाप्यमित्यपेक्षायाम् पत्नीसंयाजान्तानि पूर्वपूर्वाण्यहानि कृत्वा उत्तरोत्तरं अहरारभेतेति एवंविधानेऽपेक्षितविधिः भवति। 'हारियोजनाद्यहश्शेषं तु तन्त्रेण सर्वेषामुपरिष्टादनुष्ठेयं ततः उत्तमवर्जमेव पत्नीसंयाजान्तता इति सिद्धान्तितम्।

नन्वत्र उपांशुग्रहाभ्यासादारभ्य हारियोजनयागाभ्यासपर्यन्तप्रयोगस्याऽहश्शब्दार्थत्वेन याज्ञिकप्रसिद्धेः पत्नीसंयाजानां हारियोजनोत्तरत्वस्यैव ततः प्राप्त्या तेषां तत्पूर्वकथनं कथमिति चेन्न। तन्त्ररत्नादिप्राचीनरीत्या तदुक्तेरिति

---

[1] पूर्वोत्तरपक्षसङ्ग्राहक श्लोकयोः प्रथमस्य श्लोकस्यायमर्थो बोध्य इति शेषः।

बोध्यम् । न च घञनुपपत्तिः । कर्मणीव करणेऽपि घञः कथनात् । 'विवक्षातः कारकाणि भवन्ति' इति शाब्दन्यायेन कर्तुरेव वस्तुतः करणत्वाभावेऽपि करणान्तरानपेक्षतया करणत्वोपचारात् । तदुपपत्तेरिति [1]द्वितीयस्य । ततश्चा-देश्यमिति विवरणमयुक्तमिति शंकां तदुत्तरार्धेन वारयति कर्तुरिति । कर्तुः करणत्वेन विवक्षा तत्पूर्वककरणवाचिप्रत्ययप्रयोगः कर्तरि क्वचिदपि न दृष्टः । न हि चैत्रः पचतीति वक्तव्ये चैत्रेण पचत इति वक्तारो भवन्ति । न चाख्यातेन अभिहितस्य कर्तुः करणत्वेनाप्यविवरणात् न तत्र करणे तृतीयेति वाच्यम् । एवमपि चैत्रेण पाक इत्यापत्तेः । अत्र हि 'कर्तृकर्मणोः कृती'ति (पा. सू. २-३-६५) सूत्रेण कृद्योगे कर्तरि षष्ठीविधानात् चैत्रस्य पाक इत्यत्र षष्ठ्येव भवति न तृतीयेति तादृशप्रयोगेनेष्टापत्तिसंभवः । न च कर्तृत्व-विवक्षया चैत्रस्य पाक इति प्रयोगवत् करणत्वविवक्षया चैत्रेण पाकः इति प्रयोगस्यापि साधुत्वमिष्टमिति वाच्यम् । तथा सति 'कृत्यानां कर्तरि' (पा. सू. २-३-७१) इति सूत्रप्रणयनवैयर्थ्यापत्तेः । मम सेव्यो हरिः मया वेति प्रयोगद्वयस्यापि द्विविधविवक्षाबलादुपपत्तेः । न च कृत्यप्रत्यययोगे कर्तरि तत्वेन विवक्षितेऽपि तृतीयानिर्वाहाय तद्बाधककृद्योगलक्षणषष्ठ्यन्तेन विकल्प्यत इति वाच्यम् । कर्तरि षष्ठीवैकल्पिकत्वमात्रबोधकत्वेन सार्थक्ये कर्तृत्वप्रकार-कत्वकरणत्वप्रकारकत्वरूपवैलक्षण्यमात्रस्याकिंचित्करत्वेन सूत्रस्य तत्फलकत्वा-नुपपत्तेः । अत एव "तस्येदं" (पा. सू. ४-३-१२०) इत्यनेन सिद्धे "तस्यापत्यं" (पा. सू. ४-१-९२) इति व्यर्थमिति शङ्का प्रकारान्तरेण तत्परिहारश्च सिद्धान्तकौमुद्यां 'तस्येदमित्यपत्ये' पीति श्लोकेन कृतौ संगच्छेते । न च कृत्येतरकृद्योगे चैत्रस्य पाक इत्यादौ करणत्वविवक्षया प्रसक्ततृतीयायाः वारणमेव सूत्रफलम्, कृत्यानामेव योगे षष्ठीविकल्प इति नियमेनान्यत्र षष्ठ्ये-वेत्यस्य सिद्धत्वादिति वाच्यम् । कृर्तृकर्मणोरिति नित्ये प्राप्ते 'विभाषे' (पा. सू. २-१-११) त्येतत्सूत्रस्थशेखरादिविरोधेनास्य नियमविधित्वकल्पनानौ-चित्यात् । तस्मात्कृत्ययोगे षष्ठीविकल्पविधायकेनानेन सूत्रेण पाक्षिकतृतीयाभ्यनु-ज्ञानात् कृदन्तरयोगे तस्या अनिष्टत्वमवगम्यत इति कर्तरि करणत्वविवक्षया तदापत्तिस्स्यादेवेति सा नाश्रयणीया । अत एव 'अन्तर्धौ येनादर्शनमिच्छति'

---

[1] पूर्वोत्तरपक्षसङ्ग्राहक श्लोकयो द्वितीयस्य श्लोकस्यायमर्थो बोध्य इति शेषः ।।

(पा. सू. १-४-२८) इति सूत्र येनेत्यत्र कर्तृकर्मणोरिति षष्ठी न, सौत्रेत्वादिति शेखरकारैरुक्तम्, न तु करणत्वेन विवक्षितत्वादिति। अत एव न कर्तरि करणवाचिप्रत्यययोगो दृष्ट इति युक्तमुक्तम्। ननु 'विवक्षातः कारकाणि भवन्ती'ति शाब्दिकप्रसिद्धेः को विषय इति चेत्, कर्तृव्यतिरिक्तकारकाणि करणादीनि वैवक्षिककर्त्रादिप्रत्ययभांजि भवन्तीत्ययमेव। तथा हि लोके स्थाली पचति काष्ठानि पचन्ति, असिश्छिनत्ति, 'सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे' इत्यादौ करणादिकरणसंप्रदानादीनां कर्तृत्वाधिकरणत्वादिविवक्षया तत्तत्प्रत्यययोगो दृश्यते। संभवति च तेषां प्रकृतधातूपात्तव्यापाराश्रयत्वरूप-स्वातन्त्र्यलक्षणकर्तृत्वं कथञ्चित् आधारत्वादि च, पचेरधिश्रयणतण्डुलावपनै-धोपकर्षणादिव्यापारपरत्वे देवदत्तादेः तदाश्रयत्ववत् तण्डुलधारणज्वलनादि-रूपव्यापारत्वे स्थाल्यादीनां तदाश्रयत्वात्। अस्ति च तत्र विद्यमानमपि कर्तृव्यापारमविवक्षितम्। करणादिव्यापारस्य धात्वर्थत्वविवक्षया तेषां कर्तृत्व-विवक्षायाः फलमपि पाकादिक्रियासौकर्यातिशयद्योतनरूपम्। तथा चोक्तं यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि, कर्तृसंज्ञां लभन्ते स्वव्यापारे स्वतन्त्रत्वादिति। नत्वेवं कर्तुः करणत्वविवक्षायाः फलं किञ्चिच्छक्यमुत्प्रेक्षितुम्। न वा तस्य तत् सम्भवति विरोधात्। तथा हि कर्तृत्वं स्वातन्त्र्यम्। तच्च स्वक्रियाकारकप्रवर्तकत्वरूपम्। 'कारके' (पा. सू. १-४-२३) इति 'स्वतन्त्रः कर्ते'ति (पा. सू. १-४-५४) च सूत्रद्वयस्थ भाष्यानु-सारादिति निरूपितं मञ्जूषादौ। करणत्वं च साधकतमत्वं तच्च स्वनिष्ठव्या-पाराव्यवधानेन फलनिष्पादकत्वं, 'क्रियायाः फलनिष्पत्तिः यद्व्यापारादनन्तरं' इत्यादिकरणलक्षणपरहरिकारिकायां क्रियाया इत्यस्य फलात्मिकाया इत्यर्थ इति मञ्जूषोक्तेः। तथा च सकलकारकान्तरव्यापारप्रयोजकव्यापारवतः कर्तुः व्या-पारद्वारैव फलोत्पादकतया स्वनिष्ठव्यापाराव्यवहितोत्तरक्षणावच्छिन्नफलोत्पत्ति-कत्वरूपकरणत्वं कथं न विरुध्यते। तस्मात् न कर्तुः करणत्वादिविवक्षाविषया सा प्रसिद्धिः। किन्तु कारकान्तराणामेव कर्तृत्वकरणत्वादिविवक्षाविषयेति युक्तम्। अत एव हरिणा 'स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः', इति करणत्वविवक्षादर्शनं स्थाल्या उदाहृतम्। कैयटेनापि 'साधकतममि'ति सूत्रे यस्य चायमतिशयो विवक्षितः तस्य तदा करणत्वं यथा स्थाल्या पच्यत इत्येवोदाहृतम्।

नागोजिभट्टेनापि प्रतनुतरकपालतयाऽत्रातिशयविवक्षा बोध्या इति तदेवोपपादितम्। न तु कैश्चिदपि कर्तुः करणत्वमुपदर्शितम्। प्रत्युत कर्तुः करणत्वाभाव एवोपपादितः पदमञ्जर्याम्। तत्र हि यस्य क्रियां प्रति उपयोगातिशयेन व्यापारः प्रत्यासीदन् विवक्ष्यते तदास्य करणत्वं भवति, तद्यथा स्थाल्यधिकरणत्वेन प्रसिद्धा। तस्या अपि प्रतनुतरकपालतया प्रकर्षविवक्षायां करणत्वं भवति स्थाल्या पच्यत इत्युक्त्वा न च कर्तुरपि करणत्वविवक्षाप्रसंगः भिन्नजातीयत्वात् सकलसाधनविनियोगकारी खल्वसौ, न हि शतधनः निष्कधनेन सह स्पर्धितुं अर्हतीति प्रतिपादितम्। एतदभिप्रायेणैव म्लेच्छा मा भूमेत्यध्येयं व्याकरणमिति, भाष्ये म्लेच्छा इति कर्मणि घञिति कैयटोक्तिः, निन्दावचनत्वात् म्लेच्छतेरिति भावः। एवञ्च म्लेच्छा इत्यस्य निन्द्या इत्यर्थ इति नागोजिभट्टोक्तिश्च सङ्गच्छते। 'अन्यथा म्लेच्छो ह वा एष यदपशब्द' इति पूर्वोदाहृतभाष्यानुरोधात् म्लेच्छ अव्यक्ते शब्दे अस्फुटे अपशब्दे चेत्यर्थ इत्याद्यनुशासनबलाच्च अपशब्दार्थकस्यैव म्लेच्छतेः कर्तुः करणत्वविवक्षया घञः उपपत्तिसंभवेन प्रथमश्रुतधातोर्लक्षणापादकस्य कर्मणि घञः अभ्युपगमस्य अन्याय्यत्वापत्तेः। एतेन भर्गशब्दे करणे घञन्ततायाः दृष्टान्तीकरणं प्रत्युक्तम्। पापनिवृत्तिरूपभर्जने शिवोपासनस्य करणतया करणतावच्छेदकेऽपि करणप्रत्ययदर्शनमात्रेण कर्तुः करणत्वविवक्षया करणप्रत्यय इति प्रकृतस्य दृष्टान्तालाभात्। 'भर्गः संसारकारणाविद्यातत्कार्यदाहक' इति स्मृतिरत्ने कर्तृप्रत्ययेन तद्विवरणस्य सर्वसंप्रतिपन्नात् करणे कर्तृत्वोपचारादेव उपपत्तेः। एवमेव 'सर्वक्लेशप्रहाणादि' ति भाष्यस्थक्लेशपदव्याख्यानपरभामतीग्रन्थे सर्वक्लेशस्य सवासनस्य विपर्यासस्य। स हि क्लिश्नाति जन्तून् ततः क्लेश इति कर्तृप्रत्ययेन विवरणस्य उपपाद्यत्वादिति दिक्। "आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना" इत्यादीनां तु सार्वात्म्यविवक्षया 'पिता त्वं, माता त्व' मित्यादिवत्प्रयोगः। अहंकाराद्युपाधिभेदेन आत्मभेदमाश्रित्य तु 'आत्मानमात्मना हन्ती' त्यादिप्रयोगः आकरे समर्थितः। अन्यथा परया कर्तृत्वसंज्ञानां बाधनात् तदनुपपत्तेः। अतः केवलकरणत्वं कर्तुरिह विवक्षितुमयुक्तमिति स्थितम्।

ननु करणत्वं कर्तर्यविद्यमानमपि आरोपितं सत् करणप्रत्ययप्रयोगे हेतुः। सिंहत्वमिव माणवके सिंहशब्दप्रयोगे। उक्तं चेदं पूर्वमेव करणत्वोपचारादिति।

तथा च करणे घञो नानुपपत्तिरिति चेन्न। "साधकतमं करण" मिति (पा. सू. १-४-४२) सूत्रस्थतमब्ग्रहणेन गौणे करणसंज्ञाया एव दुर्लभत्वात्। तद्धि कारकाधिकारात् साधकमित्येतावतैव पर्यायद्वयोपादानमहिम्ना साधकतममिति प्रकर्षरूपार्थलाभसंभवेऽपि क्रियायां मुख्यस्यैव साधकतमस्य करणसंज्ञा, न गौणस्येत्येवमर्थं सत् गौणमुख्यन्यायः एतत्सूत्रादन्यत्र कारकप्रकरणे न प्रवर्तत इति ज्ञापनार्थम्। तेन तिलेषु तैलं दधनि सर्पिरित्यादि मुख्याधार इव गङ्गायां घोष इत्यादौ तीरधर्मस्य घोषाधारत्वस्य सामीप्यात् प्रवाहे उपचारेऽपि अधिकरणसंज्ञा सिध्यतीति शाब्दिकसिद्धान्तः। तथा चोक्तं शब्देन्दुशेखरे साधकतमसूत्रे—'एवं च व्यवधानेन फलोत्पादके करणत्वोपचारेण तृतीयान्तप्रयोगस्यासाधुत्वबोधनं सफलमिति'। अत्र तृतीयान्तेत्युपलक्षणं, घञन्तस्यापि करणसंज्ञोपजीवित्वाविशेषात्। एवं "ब्रह्मदृष्टिरुत्कर्षात्" इति न्यायविरोधादपि कर्तरि करणत्वारोपो न स्वीकार्यः। उत्कृष्टे निकृष्टधर्मारोपस्य राजनि भृत्यत्वारोपस्येव अनर्थावहत्वात्। अन्यथा प्रशासनकर्तरि तत्कर्मत्वारोपेणापि घञ उत्पादयितुं शक्यत्वेन तदसंभवोक्तिविरोधाच्चेति।

एवं परपक्षे शाब्दिकमर्यादया घञन्तादेशशब्दस्यासाधुत्वं दूषणमापाद्य तार्किकमतरीत्या दूषणान्तरमाह। अन्यश्चेति। तन्मते हि स्वभिन्नकर्तृव्यापाराधीनव्यापारवत्कारणत्वं करणत्वं। कर्तुः करणत्वनिरासाय कर्तृव्यापाराधीनत्वं व्यापारविशेषणम्। तत्रापि चैत्रीयकृत्यादिव्यापारजन्यतदीयचेष्टादिरूपव्यापारमादाय तन्निरासाय स्वभिन्नत्वं कर्तृविशेषणं, स्वं करणत्वाभिमतम्। ईदृशकरणत्वविवक्षया घञ् प्रयोगे प्रशासितुः तेन रूपेण बोधात् तस्य चादेशपदार्थभिन्नकर्तारं विनाऽनुपपत्तेः सोऽर्थात् सिध्येदित्यर्थः। कर्तृत्वकरणत्वादिकमखण्डोपाधिरिति मतस्य 'स्वतन्त्रः कर्ते' त्यादि (पा. सू. १-४-५४) सूत्रविरुद्धस्य परिग्रहेऽपि, करणेन कर्तुरधिकस्य आक्षेपप्रसङ्गो दुर्वार एव। कर्तृत्वकरणत्वयोर्विरोधेन एकस्मिन्नुभयासंभवात्। निक्षेपरक्षायां 'भगवतो रक्षाकरणत्वानुसन्धानं प्रवृत्ति' रिति पक्षे करणत्वस्य कर्तृत्वासंभवेन जीवस्यैव रक्षकत्वमापतेदिति। 'तथा शक्तिविपर्यया' दिति सूत्रे अन्तःकरणस्य कर्तृत्वे ततोऽन्यत्करणं स्यादिति अन्तःकरणातिरिक्तं करणान्तरमभ्युपगन्तव्यं स्यादिति च वदतां परेषां तयोर्विरोधस्य संप्रतिपत्तेः। किं च प्रकृतिप्रत्ययौ प्रत्ययार्थं

सह ब्रूत इति पाणिनीया आहुः। तथा च प्रकृत्यर्थस्य प्रत्ययार्थावच्छेदकतया अप्राधान्यं प्रत्ययार्थस्यैव प्राधान्यम्। ततश्च प्रत्ययस्योपचरितार्थत्वं अयुक्तमित्याह, **प्राधान्यमिति**। "गुणे त्वन्याय्यकल्पनैकदेशित्वात्" इति न्यायेन अप्रधानभूत-प्रकृत्यर्थस्वारस्यमुल्लङ्घ्यापि प्रत्ययो मुख्यार्थ एषितव्यः। अत एव खण्डदेव-प्रभृतिमीमांसकैः हविस्त्यागकालीनविहितशब्दोच्चारणकर्मत्वमेव देवतात्वं देव-तातद्धितार्थ इत्युपगम्य प्रधानभूततदर्थानुरोधेन अग्न्यादिप्रातिपदिके शब्द-लक्षणामप्यङ्गीकृत्य तस्यैव देवतात्वं "आग्नेयोऽष्टाकपाल" इत्यादिविधिना विधीयते इति स्वीकृतम्। अन्यथा प्रथमश्रुतप्रातिपदिकमुख्यार्थत्वाय देवतात्व-वाचिप्रत्ययस्यैव अन्यथा नयनापत्तेरिति भावः।

(अ. का.) यदुक्तमिह अपेक्षितार्थप्रसङ्ग इति शासितृत्वस्यापेक्षितस्य विधानं युक्तमिति तन्नेत्याह। **नापेक्ष्यमिति**।

(मू.) नापेक्ष्यं शासितृत्वं न खलु सत इति स्यादुपादानतापि
प्राप्त्या तस्या ह्यलाभे कथमपि भविता न प्रतिज्ञोपपत्तिः।
सा चेत् पश्चादधीतात् बहुभवनमुखाल्लम्भितेत्यत्र नार्था-
ल्लभ्यं नैवं निमित्तत्वमपि किमु सतोऽध्येष्यते हीक्षणादिः॥ ८॥

(व्या.) एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा हि निमित्तत्वमिव सत उपादानत्व-मप्यपेक्षते। निमित्तस्यान्यत्वे तदनुपपत्तिवत् उपादानस्य सदन्यत्वेऽपि तत्सत्वात्। तथा च प्रशासितृत्वोक्तिमात्रेण प्रतिज्ञानिर्वहणायोगात् तदपेक्षितोपादानत्वस्यापि प्रतिपादने अस्य शक्त्यभावाच्च नानेन द्वयमपि प्रतिपाद्यम्। किंतु "बहुस्यां प्रजायेयेति" तस्योपादानत्वमिव "तदैक्षते" ति तस्य निमित्तत्वमप्यग्रे वक्ष्यत इति तत एव प्रतिज्ञापेक्षितार्थलाभ इति किमर्धजरतीयेनेति भावः। ईक्षणा-दीत्यादिशब्देन नामरूपव्याकरणादिपरिग्रहः॥

(अ. का.) यदुक्तमसाधारणोक्त्येत्यनेनोपदेश्यत्वस्य फलसाधनसाधारण्या-दव्यावर्तकत्वमिति, तत्राह॥ **मुक्ताविति**॥

(मू.) मुक्तौ तत्साधने चाप्यधिगतमुपदेश्यत्वमास्तां तथापि
प्राधान्याद्ब्रह्मणः स्यादप्यपहृतिरमुना संगता दृश्यते हि ।
कर्मण्येवं विधेयव्यवहरणमतो नो फले साधने वा
वेदे त्वादेशशब्दो बहुलमधिगतश्शासनाच्चोपदेशे ॥ ९ ॥

यद्यप्येवं तथापि "सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः" इत्यादौ ससाधनफलस्य विधिविषयत्वेऽपि कर्मणो विधेयत्वव्यपदेशवदुपदेश्यत्वव्यपदेशः प्राधान्यादुपपद्यते । जिज्ञासासूत्रे ब्रह्मण इति कर्मणि षष्ठीं परिगृह्य ब्रह्मण एवाभिधानिकं जिज्ञासाकर्मत्वं तदुपासनादीनां तु तदाक्षेपलभ्यमिति वदतां तत्प्राधान्ये विवादाभावात् । राजवैवस्वतादिसाधारणस्य प्रशासितृत्वस्य कयाचिद्विवक्षयैव ब्रह्मासाधारण्यस्य त्वयाप्युपपाद्यत्वात् । परन्तु तव मत एवासाधारणोक्तिर्नास्ति करणे घञन्तादेशपदेन निरुपाधिकप्रशासितृत्वस्यानुक्तेः उच्यमानप्रशासनकरणत्वस्य तत्कर्मत्वात् । अत एव परमोमक्रमे आदेशपदेन प्रशासिताभिधीयते इत्युक्तम् । श्लोके सङ्गतेत्यस्य स्यादिति पूर्वेणान्वयः । दृश्यते हि अमुना इत्यन्वयः । अमुनादेशपदेन । तत्र अतः प्राधान्यादेवं संगतमित्यर्थः । नो फलेत्यत्रापि दृश्यत इत्यस्यानुषङ्गः । यच्चोक्तं "शास्तौ सोऽतिप्रसिद्धो न हि पर" इति तन्निरस्यति । **वेदे त्विति** । अत्रातिप्रसिद्धः नहीत्युक्त्या उपदेशेऽपि प्रसिद्ध इति परेषामप्यभिमतम् । तथा च एष आदेशो, गुह्या आदेशा मधुकृतस्तदादिष्टेन वर्त्मनेत्यादिवेदलोकयोरप्रशासनेऽपि बहुलं प्रयोगो दृश्यते । एवं च यथा "आकाश इति होवाच" इति श्रुतौ प्रथमश्रुते प्रसिद्धतरभूताकाशरूपार्थपरिग्रहे अनन्यथासिद्धानन्त्यरूपोपरितनलिङ्गविरोधापत्तेः तदनुरोधेन "आकाशो ह वै नाम", "यदेष आकाश आनन्दो न स्यात्" इत्यादि-श्रुतिषु ब्रह्मण्यपि दृष्टप्रयोगस्याकाशशब्दस्य ब्रह्मैवार्थ इति निर्णीतम् आकाशस्तल्लिङ्गात्, इत्यधिकरणे । तथा "अकर्तरि चेति" (पा. सू ३-३-१९) सूत्रात् कर्तृभिन्नार्थकप्रत्ययस्य कर्तरि करणत्वोपचारादिना नेतुमशक्यतयाऽनन्यथासिद्धस्य घञोऽनुरोधात् प्रसिद्धतरस्यापि प्रशासनस्य परित्यागेन क्वचिदुपदेशे दृष्टप्रयोगस्यादिशतेः स एवार्थः इति निर्णीयत इति यद्यपि वक्तुं युक्तम् । तथापि परपक्षस्य सर्वथोन्मूलनसिद्धये लोकदृष्टप्रयोगप्राचुर्यविपरीतं वेदे तस्य तत् दृश्यत इत्युक्तम् । आदेशशब्द इति आङ्पूर्वो दिशिरित्यर्थः । तथाहि ।

'आदित्यो ब्रह्मेति आदेशः', 'उभयमादिष्टं भवत्यध्यात्मं च अधिदैवतं च', 'अथात आदेश अथातोऽहंकारादेशः', 'अथात आदेशो नेति' 'गुह्या एवादेशा' 'मधुकृत एष आदेशः' इत्यादिषु तस्योपदेश एव प्रचुरः प्रयोग उपलभ्यते, न तु प्रशासने। तथा च तस्य तत्रैव वैदिकी शक्तितुल्या निरूढलक्षणा अङ्गीकार्येति तस्यैव ततः प्रथमं प्रतीतिः, वेदे प्रसिद्धतरत्वादिति भावः।

अत्रेदं बोध्यम्। यद्यपि लोकवेदानन्यत्वाधिकरणन्यायेन लौकिका एव शब्दाः वैदिका इति लोके गृहीतशक्त्यनुसारेणैव वेदेऽपि शब्दार्थो निर्णेतव्यः। तथापि अलोकप्रसिद्धार्थानां केषाञ्चिद्वैदिकपदानां तादृशार्थबोधकत्वनिर्वाहाय वैदिकी शक्तिर्वा निरूढलक्षणा वा तत्राभ्युपेया यथाऽज्यपृष्ठादिपदानां स्तोत्रविशेषेषु यथा वा अभिदधाति परिदाधातीत्यभिमन्यतिप्रभृतीनां बन्धनसमापनहिंसादिषु वेदे हि "प्रतूर्तवाजिन्नाद्रवेत्यश्वमभिदधाति" "अश्वाभिधानीमादत्ते" "अभिधान्यध्नियामुपसेवतां" "त्रिवृत्या परिदधाति" "परिधानासां त्रिरन्वाह" 'उपाकृते प्रातरनुवाके पुरापरिधानीयाया ब्रह्माव्यवदति' 'न तत्र रुद्रः पशूनभिमन्यते' 'शतोतयेभिमातिषाहे' 'संवृष्ण्यान्यभिमातिषाहः' इत्यादिमन्त्रब्राह्मणेषु तत्तद्धातूनां तत्तदर्थपरतया प्रयोगाः बहुलमुपलभ्यन्ते। तथा तदनुसारिपारमर्षसूत्रेष्वपि "वत्समभिदधाति परिहिते प्रातरनुवाक्ये अपोनप्त्रीयं नामसूक्तं परिधानीयेष्टौ" इत्यादिव्यवहाराः दृश्यन्ते। न च भूयसां तेषाममुख्यरीतित्वं युक्तम्। अतः तेषां तत्र तत्र मुख्यतरनिर्वाहिका रीतिरेवात्राप्याश्रयणीयेति॥ शासनादपि बहुलमित्युक्तिस्तु वेदानन्यत्वात् क्वचिच्छासनार्थत्वसंभावनामात्रेण। न हि वेदे क्वापि "अहतं वासः परिधत्त" इत्यादौ परिदधातेर्लोकप्रसिद्धार्थकत्वमिवादिशेः शासनार्थत्वं संप्रतिपद्यामहे। यद्यप्युपदेशादेशयोर्भेदेन प्रयोग उपलभ्यते। "एष आदेश एष उपदेश" इति। तथाऽप्यादेशशब्देन उपदेशसामान्ये प्रतिपादिते गोबलीवर्दन्यायेन उपदेशशब्दश्चोदनात्मकोपदेशपरो भविष्यति। "एषा वेदोपनिषत् एतदनुशासन" मित्युत्तरत्र तथैव दर्शनात्। यत्तु रङ्गरामानुजीयव्याख्याने 'न वायुक्रिये पृथगुपदेशादिति" न्यायेनादेशोपदेशयोः पृथगुपदिष्टयोः भेदोऽवश्यंभावीत्युक्तम्। तदेतेन निरस्तम्। किञ्च त्वदुक्तन्यायेनोपदेश इव शासनमपि आदेशो न स्यात् आदेशात्पृथगुक्त्यविशेषात्। न च शासनं जगन्नियमानुकूलव्यापारविशेष

आज्ञापनारूपः। अनुशासनन्तु ततोन्यदिति तस्य पृथगुक्त्या भेदसिद्धावपि न क्षतिरिति वाच्यम्। "शासु अनुशिष्टौ" (पा. धा. १०७५) इत्यनुशासनानुरोधेन शासनानुशासनयोः अनन्यत्वात्। तस्माद्वैदिकादेशपदस्य उपदेश इव निरूढिरिति मत्वा तदनुसारेण जघन्यघञ्प्रत्ययस्य सकलकारकप्रयोक्तृकर्तरि लक्षणा स्वीकरणीयेति तत्रैवोक्तं प्रत्युक्तम्। यदपि तत्र "पञ्चपञ्चाशतस्त्रिवृतस्संवत्सराः" इत्यादावहः परत्वस्वरस्त्रिवृदादिमुख्यत्वानुरोधेन जघन्यसंवत्सरपदस्यैव सौरचान्द्रमसाद्यनेकार्थसाधारण्येन निश्चयासमर्थस्य जहल्लक्षणाऽभ्युपेतेति दृष्टान्तकथनं तदपि न साधु। मुख्यप्रकृतिस्वारस्यानुरोधेन जघन्यप्रत्ययलक्षणाश्रयणस्यैव प्रकृते दृष्टान्तीकरणीयत्वेनास्यानुपयोगात्। असंजातविरोधिप्रथमश्रुतशब्दस्वारस्यानुरोधेन चरमश्रुतशब्दे लक्षणेत्येतावता दृष्टान्तत्वे च तार्तीयोपक्रमाधिकरणाश्वप्रतिग्रहेष्ट्यधिकरणविषयवाक्ययोः "यो होता सोऽध्वर्युर्ये यजमानास्त ऋत्विज" इत्यादौ च स्फुटतरं तत्संभवेन तदुपेक्ष्य षाष्ठसप्तमान्त्याधिकरणविषयवाक्ये तदन्वेषणक्लेशवैयर्थ्यात्। न हि "अग्ने ऋग्वेद इत्यादौ वेदशब्दस्य मन्त्रब्राह्मणसमुदायात्मकग्रन्थवाचित्वमिव" प्रजापतिर्वरुणायाश्वमयनदित्यत्र नयतेर्दानपरत्वमिव होतृयजमानादिशब्दानां तत्तदर्थवाचित्वमिव च "पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः पञ्च पञ्चादशः पञ्चदशाः पञ्च पञ्चाशतः सप्तदशाः पञ्चपञ्चाशत-एकविंशाः विश्वसृजां सहस्रसंवत्सर" मित्यत्र त्रिवृतादिशब्दानां स्तोत्रीयसंख्यारूपस्तोमवचनानामहःपरत्वं झटिति प्रतिपत्तुं शक्यं येन क्लेशो न स्यात्। किन्तु पञ्चपञ्चाशत इति पञ्चाशदधिकशतद्वयवाचिसंख्याशब्दस्य संवत्सरशब्दस्य च मनुष्येषु सहस्रायुष्ट्वासंभवात् विरोधेऽवगते तयोरन्यतरस्य गौणत्वं, तत्रापि "संवत्सरोविचालित्वा" दिति सूत्ररीत्यासौरचान्द्रसवनाद्यनेकार्थवृत्तित्वाज्जघन्यत्वाच्च संवत्सरशब्दस्य गौणत्वं तद्विपरीतत्वात्तु संख्याशब्दस्य स्वार्थपरत्वमवगत्य "यो मासः ससंवत्सर इति दर्शनात्। संवत्सरप्रतिमा वै द्वादशरात्रय इति प्रयोगाच्च। प्रसक्तं मासेषु द्वादशरात्रिषु वा संवत्सरशब्दस्य गौणत्वं निराकर्तुं त्रिवृदादिशब्दस्वारस्यमुपासनीयम्। त्रिवृदादिशब्दैर्हि स्तोममात्रवाचकैरपि तद्विशिष्टमहरेव लक्षणया प्रकाश्यते। तत्संघश्च लक्षितलक्षणया अतस्तद्भूयात्संवत्सरपदस्य मासादिपरत्वमशक्यत्वप्रतिमाशब्दविशेषणत्वादिभिरेव निराकृतमिति, नेदमनन्यथासिद्धदृष्टान्ततार्हमिति बोध्यं।

यच्च तत्र प्रकृतानुगुण्याय "प्रयाजशेषेण हवींष्यभिघारयति" इत्यत्र प्रयाजशेषप्रातिपदिकानुसारेण तृतीयाया: द्वितीयार्थलक्षणाश्रयणं दृष्टान्तान्तरमुक्तम्। तदप्ययुक्तम्। असिद्धे:, तत्र प्रयाजशेषाभिघारणस्य तृतीयाद्वितीयाभ्यां उपयुक्तसंस्कारापेक्षया उपयोक्ष्यमाणसंस्कारस्याभ्यर्हितत्वात् हविस्संस्कारकत्वमेव, न तु प्रयाजशेषप्रतिपत्त्यर्थत्वं, लक्षणाप्रसङ्गात्। न च हविस्संस्कारकत्वेऽदृष्टकल्पनापत्ते: दृष्टरूपप्रतिपत्त्यर्थत्वलाभाय लक्षणाद्वयाङ्गीकरणमपि न दोषायेति मिश्रमतमयुक्तमाश्रयितुं, निषादस्थपत्यधिकरणन्यायेनादृष्टकल्पनादे: फलमुखत्वादियुक्त्या खण्डदेवेन लक्षणां विनैव तद्वाक्यार्थोपवर्णनात्, एवं सति प्रसक्तस्य दैक्षपशौ हृदयाद्यभिघारणार्थं वाजपेये च प्राजापत्यवपाभिघारणार्थं पात्रान्तरे प्रयाजशेषो धार्य इत्याक्षेपस्य प्रयाजशेषाभिघारण वाक्येन हवि:संस्कारार्थमेव विधीयते, तथापि तु प्रयाजशेषस्य प्रतिपत्त्यपेक्षत्वात्तदनुरोधेन वाक्यान्तरकल्पनया अभिघारणस्यैव तत्प्रतिपत्त्यर्थत्वमङ्गीक्रियत इत्यादिना परिहाराच्च। न च जरन्मीमांसकमतरीत्या दृष्टान्तीकरणमिति वाच्यम्। तन्मतेऽपि कृतकार्यद्रव्यैकदेशरूपप्रयाजशेषस्य प्रतिपत्त्यपेक्षस्य हविष्षु क्षारणं प्रतिपत्ति: करिष्यमाणान्य भागार्थं जुहूरिक्तताकरणञ्च दृष्टं प्रयोजनं ततो भवति। हवींषि तु संस्कारं नापेक्षन्ते। उपस्तरणाभिघारणाभ्यामेव हविषां पात्रसंसर्गार्थस्नेहसिद्धे:। अतो हविषामभिघारणमनपेक्षितमदृष्टार्थं च। ततो दृष्टार्थलाभात् प्रयाजशेषं हविष्षु क्षारयेदिति वचनव्यक्तिराश्रयेतेति मुख्यप्रातिपदिकानुसारेण जघन्यप्रत्ययलक्षणेत्यस्यासिद्धे:। न हि प्रबलं प्रबलमित्येव दुर्बलस्य बाधिका किंतु सति विरोध इति न्यायेन बाधकताप्रयोजकस्य विरोधस्य आदिशे: प्रशासनार्थकत्वे कर्मत्वादिरूपमुख्यप्रत्ययार्थेनेव दृष्टान्ते प्रातिपदिकस्य तृतीयार्थेन साकमभावाच्च। अन्यथा मुख्यस्याप्येकस्य प्रातिपदिकस्य स्वारस्यमनुरुद्ध्य द्वयो: प्रत्यययो: लाक्षणिकत्वकल्पनस्यानुचितत्वात्। 'विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात् स्वधर्मत्वमि' ति न्यायेन प्रत्ययद्वयतत्समभिव्याहारादिस्वारस्यानुरोधेन प्रातिपदिकस्यैव स्वारस्यभङ्गौचित्यात्। तस्मात् द्वितीयदृष्टान्तोप्यसङ्गत एव। यदपि "प्राणा वा ऋषय" इत्यादौ ऋषिशब्दानुसारेण बहुवचनश्रुते: पाशन्यायेन गौणार्थत्वं "गौण्यसंभवात् तत् प्राक् श्रुते" श्चेत्यत्रोपपादितमिति तृतीयदृष्टान्तकथनम्——तदप्यशुद्धम्। संख्यातिरिक्तसुबर्थस्य प्रातिपदिकार्थ-

विशेष्यत्वेपि संख्यायाः प्रातिपदिकार्थे गुणभूतत्वेन तत्र गुणे त्वन्यायकल्पनेति-न्यायस्य प्रवृत्तावपि प्रकृते घञर्थस्य प्राधान्येन तस्य त्यागायोगात् । तन्न्या-यस्यास्माकमेवानुकूलतया प्रयुक्तत्वाच्च । 'प्राणा वा' इत्यादेः स्वविकारापेक्ष प्रागुत्पत्तेः सद्भावावधारणमित्यवान्तरप्रकृतिविषयत्वेन मूलप्रकृतिविषयत्वमनभ्यु-पगच्छतां भगवत्पादीयानामुक्तदृष्टान्तासंप्रतिपत्तेश्च । तस्मादादेशशब्दस्य उप-देश्यार्थकत्व एव प्रकृतिप्रत्ययोभयस्वारस्यमिति न प्रत्ययलक्षणाश्रयणं युक्तमिति स्थितम् ॥

केचित्तु आदेशपदस्य प्रशासनोपदेशयोः प्रसिद्धिसत्वेऽपि तत्प्राचुर्यं प्रशासन एवेति मन्वाना आहुः । उपदेशार्थकत्वे प्रकृतेः सर्वात्मना मुख्यार्थत्यागो नास्ति प्रत्ययस्य कर्तृलक्षणायां तु सोऽस्तीति जघन्यघञ्प्रत्ययानुसारेणापि मुख्यप्रकृ-तेरुपदेशार्थकत्वमेव युक्तम् कांस्यभोजिन्यायात् । तथाहि द्वादशस्य द्वितीये चिन्तितम् । आग्रयणे ऐन्द्राग्नादीनि मुख्यानि हवींषि । तेषाम् बर्हिः प्रसूनमप्रसूनं वेति न कश्चित् नियमोऽस्ति । द्यावापृथिव्य एककपालो जघन्यं हविः तस्य वैश्वदेविकैककपालप्रकृतिकत्वात् । प्रसूनं पुष्पितं बर्हिरिति नियमः प्राप्तः । तत्र किमाग्रयणे ऐन्द्राग्नाद्यनुसारेणानियतं बर्हिर्ग्राह्यं उत द्यावापृथिव्यनुसारेण प्रसूनं बर्हिरिति संशये, मुख्यत्वात् बहुत्वाच्चैन्द्राग्नादीनां तदनुरोधादनियमप्राप्तौ जघन्यस्यापि द्यावापृथिव्यस्य धर्मः प्रसूननियमः आदर्तव्यः । प्रसूनोपादानेऽपि ऐन्द्राग्नादीनामवैगुण्यादनियमे द्यावापृथिव्यस्य वैगुण्यप्रसङ्गात् । यथा अनियत-पात्रभोजिनो गुरोर्नियतकांस्यभोजिनश्शिष्यस्य च क्वचिदेकपात्रभोजनप्राप्तौ गुणभूतस्यापि शिष्यस्यानुरोधेन कांस्यपात्रनियमः आद्रियते । तद्वत् । तस्मादा-ग्रयणे पुष्पितमेव बर्हिरिति सिद्धान्तितम् । एवं अर्थद्वयेऽपि बहुशो दृष्टप्रयो-गस्यादिशतेरुपदेशपरत्वेऽप्यविरोधात् । प्रशासनपरत्वे घञोऽनाजस्यापत्तेः । घञनु-सारेण उपदेशपरत्वमेव युक्तमिति । एवं कृष्णलचरौ एकधाब्रह्मण उपहरतीति श्रुते ब्रह्मणस्समीपे भक्ष्यद्रव्याणि एकधा नयतीत्यर्थके वाक्ये एकधाशब्दस्य एक-प्रयत्नसाध्यत्वाख्यसकृत्वे एककालकत्वाख्यसहत्वे च लोके एकधा गाः कालयतीति प्रयोगात् किमनेन विधीयत इति चिन्तायां प्रकृताविडाप्राशित्रचतुर्धाकरणशं-युवाकोत्तरभक्षणानां मध्ये सकृत्त्वविधानादाद्यस्यैव करणमितरेषां निवृत्तिः, सहत्वविधानाद्वा सर्वेषां यौगपद्यमित्यनियमे प्राप्ते यत एवायं विधिस्साधारणः

अत एवातिदेशेन दुर्बलेनापि प्रापितानां हविस्संस्कारकभक्षान्तराणां बाधे प्रमाणाभावात् सहत्वमेव सर्वेषां विधीयत इति दाशमिकद्वितीयस्थन्यायतोपीदमेव युक्तम्। प्रचुरप्रसिद्धार्थत्यागमात्रत्वमवशिष्यते तत्तु न दोषाय। गायतेश्शारीरगाने प्रसिद्धिप्राचुर्ये सत्यपि पत्न्या उपगायन्ति काण्डवीणाभिरुपगायन्तीत्यत्राशारीरेऽपि काण्डवीणादिसाधनकपत्नीकर्तृकोपचयात्मकगानरूपोपगाने मुख्यत्वाविशेषात्। दिक्षु दुन्दुभयो नदन्तीति सन्निहितदुन्दुभ्यादिनादानामेव वीणागानेनोपचयं कुर्वत्यः पत्न्यो न सामगानोपगानकर्तॄणां ऋत्विजां निर्वर्तिका इति दशमे चतुर्थे सिद्धान्तिततत्वादिति। यत्त्वस्मिन् पक्षे परै दूषणमुक्तं युक्तं बर्हिराज्याधिकरणन्यायेन गायतेर्गीतिमात्रवाचित्वात्तत्र सन्निहितदुन्दुभ्यादिनादवाचित्वम्॥ इह त्वादेशशब्दस्य क्वचिदपि शिष्यो गुरुमादिदेशेति प्रयोगाभावेन साधारणोच्चारणार्थकत्वाभावादुपदेशातिदेशशब्दयोरिव उपदेशादेशशब्दयोरपि भिन्नार्थकत्वेन आदेशपदस्योपदेशार्थकत्वे मुख्यार्थत्यागोऽवर्जनीय इति। तन्मन्दम्। गीतिमात्रवाचित्वादित्यस्य 'कै गै शब्द' इत्यनुशासनानुरोधेन शब्दमात्रवाचित्वादित्यर्थकत्वे दिशिरुच्चारणक्रिय इति महाभाष्यानुसारेण दिशेरुच्चारणार्थकत्वे शिष्यो गुरुमादिशतीति शब्दप्रयोगवत् आक्रोशनादिकं कुर्वत्यपि जने गायतीति प्रयोगस्यापत्तेः। गीतिषु समाख्येति जैमिनिसूत्रोक्तसामलक्षणनिर्वाहकानुगतानतिप्रसक्तधर्मविशिष्टगानवाचित्वादित्यर्थकत्वे च दुन्दुभ्यादिगानवाचित्वमित्यस्यासङ्गतिप्रसङ्गात्। न हि दुन्दुभिनादः गानम्। उक्तञ्च खण्डदेवेन। दुन्दुभिनादो न गानात्मकः। दुन्दुभेः वाद्यरूपतया तन्नादस्य तालाभिव्यञ्जकषड्जादिस्वरसमाहारात्मकगानरूपत्वाभावादिति। किञ्च आदेशपदस्य प्रशासनोपदेशसाधारणातिप्रसक्तरूपेण तयोरेकशब्दस्वीकारे दर्शितप्रयोगापत्तिसंभवेऽपि हरिशब्दस्य इन्द्रोपेन्द्रयोरिव तस्य तयोः पृथक् शक्त्यभ्युपगमेन तदापत्तिसंभवः। न हि शिष्यकर्तृकं प्रशासनमुपदेशो वा गुरौ संभवति। अतः प्रागुक्तद्विविधप्रयोगानुसारेण द्वयोरपि मुख्यार्थत्वानपायेन कुतः प्रकृते मुख्यार्थत्यागः। एतेनातिदेशशब्दस्य दृष्टान्तीकरणमयुक्तं व्याख्यातम्। तस्य क्वचिदपि उपदेशे प्रयोगानुपलंभात्। आदेशशब्दस्य तत्र भूयः प्रयोगाच्च दृष्टान्तदार्ष्टान्तिकयोः विषमत्वात्। तस्मात् घञन्तप्रत्ययलक्षणावादः सर्वथापि निर्बीज इति सिद्धम्। यदप्युक्तम्—"उपदेशेऽजनुनासिक इत्" (पा. सू.

१-३-२) इति सूत्रे "करणाधिकरणयोश्चे" ति (पा. सू. ३-३-११७) ल्युटा-बाधितस्य घञः, 'अकर्तरि च कारके संज्ञाया' मित्यतः (पा. सू. ३-३-१९) प्रसङ्गमाशङ्क्य 'कृत्यल्युटो बहुलमि' ति (पा. सू. ३-३-११३) घञो भाष्य-कृता समर्थितत्वात्। तन्न्यायेन कर्तर्यपि तेनैव सूत्रेण घञस्सिद्धौ लक्षणाया अभाव इति। तदप्यसत्। तत्र हि उपदेशशब्दे 'अकर्तरि च' (पा. सू. ३-३-१९) इत्यादिसूत्रेण करणे घञोऽसंभवः। तदपवादभूतेन "करणाधि-करणयोश्चे" ति (पा. सू. ३-३-११७) ल्युटा बाधात्। तस्याप्यपवादभूतेन पुंसि संज्ञायां घः प्रायेणेत्यनुवृत्तिमता 'हलश्चे' ति (पा. सू. ३-३-१२१) सूत्रेण तु न तत्संभवः। असंज्ञात्वात्। प्रायेणेत्यस्यानुवृत्तस्य संज्ञायामित्यनेन संबन्धात् संज्ञायां घञ् भवति क्वचिदसंज्ञायामिति तु न चोद्यम्। प्रत्ययस्य विधेयत्वेन प्राधान्यात् तेनैवान्वयार्हतया प्रायग्रहणस्य गुणभूतया संज्ञयाऽन्वया-योगात् इत्याशंक्य असंज्ञायामपि बाहुलकात् घञ् समर्थितो भाष्यकृद्भिः। तदुक्तं—तत्रैवान्ते कैयटेन एवं तर्हिति। बहुलग्रहणादसंज्ञायामपि घञ् भविष्यतीत्यर्थः। न तु क्वापि महाभाष्ये वा अन्यत्र वा कर्तरि घञिति वाक् अविश्रुतपूर्वा। प्रत्युत "भुजन्युब्जौ पाण्युपतापयो" रिति (पा. सू. ७-३-६१) सूत्रस्थभाष्यरीत्या कर्तरि घञ् दुर्लभ एव। तथाहि तत्र "भुजः पाणौ" भुजः पाणाविति वक्तव्यं कथं न्युब्ज उपताप इति न्युब्जेः कर्तृत्वाद-प्रतिषेधः। अनर्थकः प्रतिषेधः अप्रतिषेधः कुत्वं कस्मान्न भवति। कर्तृत्वात् नैतत् घञन्तं। कर्तृप्रत्यय एष न्युब्जतीति न्युब्ज इति। अत्र हि भाष्ये नैतत् घञन्तम्। कर्तृप्रत्यय एष इत्यनेन घञ्प्रत्ययकर्तृप्रत्यययोर्विरोधोक्त्या कर्तरि घञो दौर्लभ्यं व्यज्यते। न चान्यत्रादृष्टत्वेऽपि कर्तरि घञत्रैव स्वीक्रियत इति वाच्यम्। अकर्तरि चेति निषेधवैयर्थ्यापत्तेः। परन्तु उपदेशशब्द इव महाभाष्योक्तरीत्या आदेशशब्दे करणे घञन्तत्वं सूपपादमिति तदेव येन वा परब्रह्म आदेश्यते स आदेश इति पक्षान्तरतया भाष्योक्तं समर्थितं भवति। कर्तुः करणत्वेन विवक्षा च प्रागेव निरस्ता। तस्मात् अगतिकगतिभूतबाहु-लकाश्रयणेनापि न पराभिमतसिद्धिः। कर्तरि घञोऽभावादेव सिद्धान्तकौमुदी-शब्दकौस्तुभादिप्रौढानेकप्रबन्ध-निर्मातृशाब्दिकशिरोमणिश्रीभट्टोजिदीक्षितैः स्वकृते तत्वकौस्तुभे ज्योतिरुपक्रमाधिकरणे माध्वमतसिद्धं कर्मकाण्डस्य ब्रह्मपरत्वं

प्रतिपादयितुं वसन्तादिवाक्ये ज्योतिषा यजेतेत्यत्र आसमन्तात् यजैः यज्वभिः इतः प्राप्त इत्यर्थः यजेः घञर्थे कविधानकमिति कप्रत्ययः संप्रसारणाभावश्छान्दस इति माध्वव्याख्यानमनूद्य यजैः यज्वभिरिति व्याख्याय घञर्थे क इति वदता घञर्थस्सम्यक् बुद्ध इत्यपहासः कृतः। एतेनादेशनमादेश इति भावघञन्तात् अर्श आद्यच्प्रत्यये सति आदेशवानादेशः प्रशासितेत्यर्थ इति परोक्तं प्रत्युक्तम्। तद्धितान्तत्वकल्पने मानाभावात्। मत्वर्थीयेन सम्बन्धिमात्रस्यावगमेऽपि प्रशासनकर्तृत्वाप्रतीतेः। तस्य च कर्मादिकारकान्तरसाधारण्येनाव्यावर्तकत्वात्। आवश्यकघञैवोपपत्तौ विना प्रमाणं स्वमतसाधनायैव प्रत्ययान्तरकल्पनस्य श्रुत्यार्थाव्यवस्थापकत्वेनान्याय्यत्वाच्च। अन्यथा ब्रह्मणो ज्ञानानन्दादिरूपत्वप्रतिपादकश्रुतीनामपि नैयायिकाभिमतप्रक्रियया ज्ञानाद्याश्रयत्वमात्रपरत्वापत्त्या तस्य ज्ञानानन्दरूपत्वासिद्धिप्रसङ्गात्। कारणवाक्यश्रुतनारायणशब्दस्यापि नारायणी रमागौर्योरित्यनुशासनसिद्धगौरीनामनारायणीशब्दप्रकृतिकार्श आद्यजन्तत्वकल्पनया देवतान्तरसाधारण्यापत्तेश्च। न चोभयत्रापि इष्टापत्तिः। तत्वमुक्ताकलापादौ 'निष्कृष्टेऽस्मिन् शरीरिण्यमलगुणगणालंकृतानन्दरूप' इति 'निस्साधारण्यनारायणपदविषये निश्चयं यान्त्यबाधे' इति चैवमादिभवदाचार्योक्तिविरोधात्। न च अर्श आद्यजन्ततामाश्रित्य नारायणशब्दस्य शिवपरत्वे "नेशान" इत्युत्तरितनवाक्यशेषविरोध इति वाच्यम्। "ध्यायीतेशान" मित्यथर्वशिरोवाक्यस्थेशानशब्दस्य तव मते विष्णुपरत्वेन प्रयोगवत् अत्रापि "न ब्रह्मा नेशान" इत्यत्र ब्रह्मविष्ण्वोरग्रकालासत्त्वप्रतिपादनेन वाक्यशेषोपपत्तेः। तस्मात् आदेशपदस्य अर्श आद्यजन्तत्वकल्पनमपि निष्प्रमाणकमेव। उक्तातिप्रसङ्गापादकञ्च। अतश्च करणत्वविवक्षाकर्तृलक्षणाबाहुलकाश्रयणार्श आद्यजन्तत्वपक्षाणां चतुर्णामपि दुष्टत्वेन प्रशासित्रर्थकत्वासंभवात् आदेशपदस्य कर्मघञन्तस्य उपदेश्यपरत्वमेवेति सिद्धम्॥

(मू.) प्रष्टव्यत्वोक्तितस्स्यात् सत इदमुपदेश्यत्वमर्थात्प्रतीतं
मैवं सैवोक्तिमस्यार्थं यत इति तथाक्षेपणं ह्यस्य दूरे।
मन्तानूचानमानी सदपि हि परतो वेद्यमेवैष नो चेत्
तस्मादत्राद्वितीयः प्रथमतरमुपक्रान्त आत्मेति सारम्॥ १०॥

(व्या.) ननु उपदेश्यत्वं सतो न वक्तव्यम्। प्रष्टव्यत्वोक्त्याऽर्थसिद्धत्वादिति प्रथमचरणेनाशङ्क्य परिहरति मैवमित्यादिचरणद्वयेन। प्रष्टव्यत्वोक्तिरेवास्य उपदेश्यत्वस्य वचनमपेक्षते। अतश्च तयाऽस्यार्थसिद्धिः दूरे हि। दूर एव। नैव संभवतीत्यर्थः। हि यतः उपदेश्यत्वानुक्तौ अनूचानमानी एष श्वेतकेतुः सदपि स्वत एव उपायान्तरादेव ज्ञेयम्। मन्ता मन्तुं शीलमस्यास्तीति ताच्छील्ये तृन्। स्वबुद्ध्या सर्वमूहितुं शक्यते किमत्र प्रष्टव्यमिति मानशील इत्यर्थ इति व्याख्येयेन तदुक्तौ अब्भक्षादिवत् उपदेशैकगम्यत्वप्रतीतेः तादृशं सत् आचार्य एव प्रष्टव्यः न स्वबुद्ध्योहितुं शक्यमिति प्रष्टव्यत्वोक्तिरुपपादिता भवति। अत एव उत तत् ब्रह्माप्राक्ष्य इति प्रसिद्धब्रह्मशब्देन प्रश्नकरणं विहाय ब्रह्मण्य-प्रसिद्धेनादेशशब्देन प्रश्नकरणमयुक्तमिति शंकापि निरस्ता। अप्राक्ष्य इत्यत्र हेतुत्वेन तत्पदस्य अर्थवत्वात्। अत एव "तं त्वौपनिषदं त्वां पुरुषं पृच्छामि" इत्यादिश्रुत्यन्तरेऽपि प्रष्टव्यस्य उपदेश्यत्वलक्षणमौपनिषदत्वविशेषणं श्रूयत इति समादधान एव परमोपक्रमस्य निर्विशेषब्रह्मपरत्वसिद्धिं घञर्थविचारफलमु-पसंहरति तस्मादिति। 'न लोके' त्यादिना षष्ठीप्रतिषेधात्सदपीति कर्मणि द्वितीया। 'हि हेताववधारणे' इति अमरसिंहवचनात् पूर्वार्धे हिरवधारणार्थः। उत्तरार्धे च हेत्वर्थो बोद्धव्यः॥

(अ. का.) एवं आदेशादे वर्णिते पराभिमताशक्यानुङ्गस्यापि प्रतिक्षेपेण सिद्धान्त उपपादितः। यत्ववर्चीनः कश्चित् पचाद्यजन्त एवायमादेशशब्दस्स-मर्थयितुं शक्य इति प्रलपति तं निरस्यति। कल्प्य इति।

(मू.) कल्प्यो बालैः पचाद्यच् कथमिह कविधेर्बाधनाय क्षमस्स्यात्
क्लृप्तं शास्त्रं बलीयोऽभ्युपगतमखिलन्यायविद्भिः प्रकल्प्यात्।
क्लृप्तोत्सर्गापवादावपि हि समबलौ सावकाशेऽपवादे
निर्मूला कल्पनेयं स्थलमिदमपहायास्य कुत्राप्यदृष्टेः॥ ११॥

(व्या.) यद्यपि पचाद्यच्विधे अपवादः कविधिरिति प्रागुपपादितत्वात् तस्य कविध्रिबाधकत्वशङ्कैव निरालम्बा। तथापि इगुपधत्वापेक्षया विशेषरूपेण दिशित्वेन पचादित्वकल्पनेन अच एव कापवादत्वमित्यभिमानमूलिकेयं शंका। एतादृशकल्पनमेव नोन्मज्जनमर्हति न्यायविरोधादिति तन्निराकरणं **पूर्वार्धेन**

विवक्षितम्। अस्ति हि पूर्वमीमांसायां प्रमाणलक्षणे 'विरोधे त्वनपेक्षं स्यादसति ह्यनुमान' मिति प्रसिद्धो न्यायः। अस्ति च तत्रैव तार्तीयः 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षा' दिति। तथा च सर्वौदुम्बरीवेष्टनाष्टाचत्वारिंशद्वर्षब्रह्मचर्यप्रतिपादकस्मृतिमूलकल्पनीयश्रुतितः 'औदुम्बरीं स्पृष्ट्वा उद्गायेत्' जातपुत्रः कृष्णकेशोऽग्नीनादधीते' ति श्रुतेः, 'कदाचनस्तरीरसीति मन्त्रगतेन्द्रप्रकाशनसामर्थ्यरूपलिङ्गकल्प्यतदंगताबोधकश्रुतितः 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति तन्मन्त्रस्य गार्हपत्योपस्थानांगत्वबोधकश्रुतेश्च प्रत्यक्षपठितत्वेन प्राबल्पात् यथा ताभ्यां तयोर्बाधः तथा क्लृप्तेन बलीयसा इगुपधकप्रत्ययविधायकशास्त्रेण कल्पनीयत्वेन दुर्बलस्य पचाद्यच्विधेः बाध एवोचितः। न च 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा. सू. ३-१-१३४) इति पचाद्यज्विधिरपि प्रत्यक्ष एवेति वाच्यम्। तस्य स्वरूपेणाकल्प्यत्वेऽपि दिशि धातुपाठविशिष्टत्वेन कल्पनीयत्वावश्यंभावात्। अन्यथा काप्यवादत्वोक्त्ययोगात्। बाधश्च प्रत्यक्षशास्त्रेण औदुम्बर्यादीनामवेष्टितत्वादिना निश्चिततया। तथा गार्हपत्यांगत्वावगमेन मन्त्रस्य निराकांक्षीकृततया च सर्ववेष्टनादिप्रतिपादकश्रुतौ लिंगकल्प्यश्रुतौ च जिज्ञासालक्षणाकांक्षारूपकारणविरहात् आकांक्षामूलकस्य तयोः कल्पनस्यैवानुन्मेषः। तयोः प्रत्यक्षशास्त्रापरामर्शरूपदोषात् कदाचित् कल्पनेऽपि तत्परामर्शोत्तरं तत्राप्रामाण्यनिश्चयो वा वार्तिकरीत्या प्रथमस्थले अननुष्ठापकत्वलक्षणमप्रामाण्यं वा यादृशस्तत्र स्वीक्रियते तादृश एवात्रापि बोद्धव्यः। इहापि क्लृप्तशास्त्रेण कप्रत्ययान्ततया दिशेर्निश्चितत्वेन अज्विधायकशास्त्रे कल्पनामूलाकांक्षाविरहस्य कथञ्चित्कल्पनेऽपि तदप्रमाण्योपपादकस्य च तुल्यत्वादिति भावः। ननु पूर्वतन्त्रन्याय इह किमर्थं उपन्यस्यते। न हि व्याकरणे क्वचिदपि तदाश्रयणं दृश्यते इत्याशंक्य

'प्रत्यक्षे चानुमाने च यथा लोके बलाबलम्।
शीघ्रमन्थरगामित्वात् तथेह श्रुतिलिंगयोः॥' इति

मीमांसकैश्श्रुतिलिंगादिषूपवर्णितः बलाबलप्रयोजकशीघ्रमन्थरगामित्वन्यायः तथात्वेन वैयाकरणैरप्याश्रीयत एव। अत एव 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्,' इति (पा. सू. ७-१-३५) सूत्रे अनेकाल्त्वात्सर्वादेश इत्युक्त्वा यद्यपि ङिच्चेत्य-

र्थमपवादः तथापि अनन्यार्थङकारेषु अनङादिषु चरितार्थोऽयं गुणवृद्धिप्रतिषेध-संप्रसारणाद्यर्थतया संभवत्प्रयोजनङकारे तातङि मन्थरं प्रवृत्तः परेण बाध्यते। इह उत्सर्गापवादयोस्तुल्यबलत्वादित्युक्तं तैः। अनेन हि 'ङिच्चे' ति (पा. सू. १-१-५३) शास्त्रस्य विलम्बितप्रवृत्तिकत्वमपवादत्वनिबन्धनबलनिरासपूर्वकपरबाध्यत्वप्रयोजकोत्सर्गतुल्यबलत्वरूपदौर्बल्यहेतुरिति स्फुटीकृतमिति परिहरन् यदा क्लृप्तापवादशास्त्र एव इयं गतिः। तदा का कथा कल्पनीयापवादशास्त्र इति प्रकृते कैमुतिकन्यायं सूचयति। लक्ष्यदर्शनं नेति वक्तुमशक्यम्। तस्य वैदिकस्य लौकिकस्य च प्रागुपदर्शितत्वात्। अत एव 'आपं चैव हलन्तानां' इति वचनस्य भाष्येऽदर्शनादप्रामाणिकत्वेऽपि निशिदिशोरिगुपधलक्षणे कप्रत्ययेऽदन्तत्वादेव टाबिति शेखरकृतां दिशा शब्दव्युत्पादनमपि सङ्गच्छते। नाप्येतदनन्यथासिद्धम्। घञन्तत्वोपपत्तेः। न वा कर्तृप्रत्ययान्ततया सर्वसंप्रतिपन्नमिति वैषम्यं दृष्टान्तदार्ष्टान्तिकयोरिति। अत एव दार्शपूर्णमासिक शूर्पादाने विनियुक्ते 'वेषायत्वे' ति मन्त्रे सर्वव्यापिने विष्ण्वात्मने यज्ञाय त्वामाददे इत्यर्थलाभाय वेषो विष्णुर्यज्ञ इति पर्यायः पचाद्यजन्तः वृषादित्वादाद्युदात्तत्वमिति भट्टभास्करीयभाष्यविरोधोऽपि नाशङ्कनीयः। विष्णोस्स्थानमसि विष्णोस्तूपोसि अदस्तयसि विष्णवे त्वा अग्नाविष्णू मावावक्रमिष्टं यज्ञो वै विष्णुरित्यादिमन्त्रब्राह्मणेषु विष्णुशब्दस्येव वेषशब्दस्यापि यज्ञपरत्वावश्यम्भावेन वेषाय ह्येनदादत्त इति तद्ब्राह्मणवाक्यात्तस्य तत्परत्वावगमेन च इगुपधस्यापि विष्लृधातोः पचादित्वकल्पनस्य समूलत्वात्। उक्तकल्पनामूलान्तर्गतसम्प्रतिपन्नत्वस्याभावे विप्रतिपन्नस्थलादन्यत्र क्वचिदपि कर्तृप्रत्ययान्तस्य तस्यादर्शनं प्रमाणयति **स्थलमिदमिति**। दृशिक्रियासमानकर्तृकत्वमादायात्र ल्यबुपपादनीयः। एतेन कप्रत्ययान्ततामेवाश्रित्य क्ङिति चेति गुणनिषेधस्य संज्ञापूर्वकत्वेनानित्यादप्रवृत्त्या गुणे सत्यादेश इति कर्तरि रूपं सिध्यतीति परास्तम्। 'संज्ञापूर्वको विधिरनित्य' इत्यस्य भाष्ये तु न दृश्यत इत्यादिना शेखरे अप्रामाणिकत्वोक्तेः। कैयटहरदत्ताद्यनुरोधेन स्वीकारेऽपि यथादर्शनं तादृशविधेरेवानित्यत्वसिध्या निषेधस्य तदयोगाच्च। न हि संज्ञापूर्वको निषेधः क्वचिदप्यनित्य उपलभ्यते। पीवरोरु, पिबतीव बर्हिणः, धाम स्वायम्भुवं ययुः हरिहतादस्तया इत्यादौ तादृशगुणविधिरिव न क्वापि ग्रन्थे कैश्चिदपि निबन्धृ-

भिस्तथा व्यवह्रियते । नापि तथा व्यवहर्तुं शक्यः । निषेधस्याभावांशे विधित्वोपगमेऽपि "ओर्गुण' (पा. सू. ६-४-१४६) इति ज्ञापकवृत्त्यनुसारेण निर्वक्तव्यस्य विधेयसमर्पकपदे संज्ञात्वस्य नञ्पदे दुर्लभत्वात् । तस्मादादेश इति सगुणरूपासिद्धिप्रसङ्गात् कप्रत्ययान्तत्ववर्णनमप्ययुक्तमेव ।

नन्वेवमपि आदेशयतीत्यादेश इति णिजन्तात्पचाद्यच्प्रत्ययोपगमे बाधकाभावात् तमेवाश्रित्य णेरनिटीति णिलोपेन आदेशशब्दः कर्तरि व्युत्पादयितुं शक्यत इति चेन्न । णिजन्तभावकल्पने मानाभावात्, दिशेश्चुरादित्वाभावेन स्वार्थिकणिचोऽसम्भवात् । 'हेतुमति चे' ति (पा. सू ३-१-२६) सूत्रेण णिचि शासनप्रयोजकव्यापारकर्तुरेवादेशपदार्थत्वापत्त्या शासितारमित्यर्थवर्णनायोगात् । "प्रार्थयन्ति शयनोत्थितं प्रिया" इत्यादौ परस्मैपदसाधुत्वार्थमवश्योपगन्तव्यस्य णिजन्ताद्धेतुमण्णिचः प्रकृत्यर्थपर्यवसाननिर्वाहकस्य निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजुच्यत इत्याश्रयणस्य गत्यन्तराभावविषयत्वात् । आदिश्यतेऽनेनेत्यादेश इति भवदीयभाष्यादिविरोधाच्च ।

नन्वस्तु कप्रत्ययान्त एवायमादेशशब्दः कप्रत्ययस्य सार्वधातुकत्वं तस्मिन्सति प्रवृत्तस्य शविकरणस्य गुणविरोधिङित्वसम्पादकसार्वधातुकत्वापहारकार्धधातुकत्वं छन्दस्युभयथेति सूत्रेणाश्रित्य क्ङितिचेति निषेधनिवारणेन गुणप्रवर्तनसम्भवादिति चेन्न । एतादृशादृष्टचरातिक्लिष्टकल्पनस्य कर्तुः करणत्वविवक्षारक्षोऽप्यतिक्षोदीयः प्रेक्षावतामत्यन्तमुपेक्षणीयत्वात् । न हि 'वर्धं तु त्वा सुष्टुतय' इत्यादौ णिलोपनिर्वाहाय शप आर्धधातुकत्वस्य यजमानायैव भ्रातृव्यमुपास्ति करोति क उग्रां केह शृबिरे इत्यादौ अस्तेर्भूभावाभावाल्लोपयोः शृणोतेः श्नुप्रत्ययश्रादेशयोश्च निर्वाहाय क्तिन् लिडादेशयोस्सार्वधातुकत्वस्य च वर्णनमिव उक्तसूत्रेण प्रकृते प्रत्ययद्वयस्य संज्ञाद्वयवर्णनमावृत्त्यादिक्लेशं विना सम्भवति । प्रतिलक्ष्यं लक्षणस्य क्रमेण प्रवृत्तेः आवृत्तिं विना दुर्घटत्वात् कप्रत्ययस्य सार्वधातुकसंज्ञामनेन विधाय कर्त्रर्थे सार्वधातुके परतः विहितस्य शविकरणस्य उत्पत्त्यनन्तरमेव 'सतो हि कार्यिण' इति न्यायेन तस्य ङित्वविरोध्यार्धधातुकस्यैवानेन विधातव्यतया युगपदुभयत्र लक्षणप्रवृत्तेरनाशङ्कनीयत्वाच्च । अत एव शेषलक्षणे 'सर्वार्थमप्रकरणा' दित्यधिकरणे अनारभ्या-

धीतेन 'यस्य पर्णमयी जुहूर्भवती' त्यादिना अव्यभिचरितक्रतुसम्बन्धिजुहूद्देशेन विधीयमाना पर्णता तद्द्वारा जुहूसाध्यप्रकृतिविकृतिसाधारणसर्वक्रत्वंगं न प्रकृतिमात्रगामिनीति पूर्वपक्षे विकृतौ जुहूप्राप्तेरतिदेशायत्तात् तस्य च प्रकृतेस्सर्वांगसम्बन्धोत्तरकालीनत्वेन पर्णताविधेः प्रथमं प्रकृतिविषयशाब्दबोधजनकत्वावश्यम्भावे पुनर्विकृतिविषये तज्जनकत्वायोगेन प्राप्तिकालवैषम्यात् उपदेशतः प्रकृत्यर्थैव पर्णता न विकृतिसाधारणीति मीमांसकैस्सिद्धान्तितम्। इयांस्तु विशेषः। यत्तत्र विकृतावतिदेशतः पर्णताप्राप्तिः। इह तु तदभावात्सूत्रावृत्तितः पाश्चात्यप्रत्यये संज्ञाप्राप्तिरिति न केवलमावृत्तिक्लेश एव। किंत्वादेशपदे धातुतदुत्तरप्रत्ययमध्ये अप्रामाणिकगौरवदुष्टः प्रत्ययान्तरप्रश्लेषक्लेशोऽपि बोध्यः। किञ्चानन्यथासिद्धकतिपयछान्दसप्रयोगनिर्वाहैकप्रयोजनकस्य उक्तसूत्रस्य सार्वत्रिकलौकिकवैदिकसाधारणस्वारसिकप्रयोगनिर्वाहकशास्त्रैस्तुल्यकक्ष्यतया प्रवृत्त्युपगमे 'कर्मणि द्वितीया कर्तृकरणयोस्तृतीये' (पा. सू. २-३-१८) त्यादिशास्त्रैस्तुल्यकक्ष्यतया सुपांसुपो भवन्तीति वचनकामधेनोरपि प्रवृत्तिसम्भवात्, 'सोमेन यजेत दध्ना जुहोति व्रीहीन् प्रोक्षति व्रीहीनवहन्ती' त्यादौ द्वितीयास्थाने तृतीयायास्तत्स्थाने च द्वितीयायाः वक्तुं शक्यतया तत्तच्छब्दस्वारस्यप्रतिपन्नार्थकर्मत्वसंस्कारकर्मत्वादिव्यवस्थायास्सर्वमीमांसकसिद्धायाः लोपापत्तेः तदुपगमो न युक्तः। न चा 'दितिः पाशान् प्रमुमोक्ति' ति मंत्रे सुपां सुपो भवन्तीत्यनेन एकवचनस्थाने बहुवचनं स्वीकृतमिति वाच्यम्। गुणभूतवचनानुरोधेन प्रधानभूतानां बहूनामुत्कर्षे प्रमाणाभावात्। दैक्षपशुप्रकरणानुग्रहाय तत्र तत्स्वीकारेऽपि इहोक्तसूत्रप्रवृत्तौ नियामकाभावात्। एवमपि यदि प्रशासिता आदेशपदार्थ इति अन्यतो निर्णीयते, तदाऽतिक्षुद्रमपीदं कल्पनमाद्रियेत न तु तथा निर्णायकमन्यदस्ति प्रकरणोपपदादिकम्। आदेशपदादेव उक्तकल्पनसहकृतात् तदर्थलाभोक्तौ तु अन्योन्याश्रय इति दिक्।

ननु तर्हि कर्तुः करणत्वविवक्षापक्षमेवावलम्बामहे। न चायं पक्षः प्राङ्निराकृत इति वाच्यम्। तस्य सुदर्शनाचार्यप्रभृतीनां भवदीयानामनभिमतस्य भवता परिष्करणीयत्वेन निराकरणीयत्वात्। तथा हि चतुर्वेदतात्पर्यसंग्रहे गायत्र्यर्थनिरूपणे तद्घटकभर्गपदमधिकृत्य सुदर्शनाचार्यैरुक्तं 'व्यत्यस्तकारकमकैमि पदं भजन्तं मैत्रायणश्रुतिपराहतसान्तभाव' मिति। ननु भृज्जति

पचति दहति कामादीति वा, स्वोपासकानां पापानीति वा भर्ग इति कथं कर्तरि घञन्तत्वेन भर्गपदं व्युत्पाद्यते। 'अकर्तरिति च कारक' इति (पा. सू. ३-३-१९) कर्तरि घञो निषेधादिति शङ्कया व्यत्यस्तेत्यादिकमवतार्य व्यत्यस्तकारकं विपरीतकारकमिति तद्व्याख्यातं च व्याख्यातृभिः। तत्र कर्तुः करणत्वमेव कारकविपर्यय इति वक्तव्यमन्यस्य दुर्वचत्वात्। तथा च तद्विवक्षयैव घञ्प्रत्ययोपपत्तिरिति शङ्कापरिहाराभिप्रायः स्फुटीकृत इति चेन्न। आदेश-शब्दस्य संज्ञात्वाभावेन भर्गशब्दवैषम्यात्। भर्गशब्दो हि 'हरस्स्मरहरो भर्ग' इति कोशात्, 'एष रुद्रो भर्गाख्य इति मैत्रायणश्रुतिगताख्यापदाच्च शिवसं-ज्ञात्वेन सुप्रसिद्धः। संज्ञाशब्दानां च रूढ्यर्थतावच्छेदकरूपेणोपस्थिते संज्ञिनि यथाकथञ्चित् व्युत्पादनेन साधुत्वान्वाख्यानं व्याकरणे बहुशो दृश्यते। यथा सामविशेषे रथेन तरतीति व्युत्पादनेन रथन्तरशब्दस्य न हि "संज्ञायां भृ-तृवृजिधारिसहितपिदम" इति सूत्रेण खच्प्रत्ययान्ततया सिद्धस्य रथन्तर-शब्दस्य उक्तावयवार्थः कथञ्चिदपि सामन्यन्वेति। सर्वथानन्वितस्याप्यर्थस्य साधुत्वान्वाख्यानोपपादकतामात्रेण तत्र विवक्षणे तत्क्रियाकारकत्वव्याप्यकर्तृ-त्वरूपधर्मावच्छिन्ने तादृशकरणत्वरूपधर्मान्तरस्यानुचितस्यापि तथात्वमात्रेण प्रकृते विवक्षणस्य कैमुतिकन्यायसिद्धत्वात्। सर्वथाऽपि गायत्रीगतभर्गशब्दस्य रूढ्या शिवपरत्वमित्यत्रैव श्रीसुदर्शनाचार्याणामाशयात्। परं तु वैयाकरण-हृदयङ्गमाख्यायां अमरकोशव्याख्यायां भृज्यतेः पचाद्यच् कुत्वं तु न्यंक्वादि-त्वादिति प्रक्रिया भर्गपदस्य प्रतिपादिता। सा तु तस्याद्युदात्तत्वस्वरानुरोधेन वृक्षादित्वकल्पने गौरवभिया तैर्नाश्रितेति ध्येयम्। वस्तुतस्तु योगार्थप्राधान्ये विभर्ज्यन्ते पच्यन्ते दह्यन्ते पापान्यनेनेति भर्गः करणे घञ् रमागमे 'चजो' रिति (पा. सू. ७-३-५२) कुत्वे च रूपसिद्धिः करणत्वं च शिवस्य तदुपासना-र्चनादीनां 'धर्मेण पापमपनुदति' 'एवंविधे कलियुगे दोषाणामेकशोधनम्। महादेवनमस्कारो ध्यानं दानमिति श्रुति' रित्यादिश्रुतिस्मृतिसिद्धकरणतायाम वच्छेदकतया धूमज्ञानस्यानुमितिकरणतामते धूमेन वह्निमनुमिनोमीति प्रयोग-नियामकं धूमस्य करणत्वमिव वास्तवमेव न तु वैवक्षिकमिति प्रागुक्तं न विस्मर्तव्यम्। सर्वथाऽपि प्रागुक्तरीत्या केवलयौगिकादेशपदे कर्तरि करणत्व-विवक्षया घञिति पक्षो न सम्भवत्येवेति तदपेक्षयापि जघन्यः कप्रत्ययान्त-

त्वपक्षोऽपि नतरां सम्भवतीति । तस्मात् प्राचीनोक्तपक्षचतुष्टयमिव दिशिधातोस्तत्प्रकृतिकणिजन्तधातोर्वा पचाद्यजिति पक्षौ दिशिधातोरेवार्धधातुकसार्वधातुककप्रत्ययान्तत्वपक्षौचेति पक्षचतुष्टयमप्यर्वाचीनकल्पितं दुष्टमेवेति सिद्धम् ।

नन्वेवमपि प्राड्विवाकशब्दस्य अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट् 'क्विप्वची' त्यादिना क्विप्दीर्घश्च । 'व्रश्चभ्रस्जेति' (पा. सू. ८-२-३६) षत्वम् । विविच्य वक्तीति विवाकः । वच परिभाषण इत्यतः 'कृत्यल्युटो बहुल' मिति (पा. सू. ३-३-११३) बहुलग्रहणात् कर्तरि घञ् । प्राट् चासौ विवाकश्चेति प्राड्विवाक इति । पृच्छन् प्राड् । विविच्य वचनं विवाकः, प्राट् च विवाकश्च प्राड्विवाकौ तावस्य स्त इति प्राड्विवाकः । अर्श आदित्वादच्प्रत्यय इति च धर्मशास्त्रादौ व्युत्पादनदर्शनात् । तद्रीत्या आदेशपदेऽपि रङ्गरामनुजीयदर्शितव्युत्पादनं तृतीयचतुर्थकल्पात्मकं युक्तमिति चेन्न । "विवादानुगतं पृष्ट्वा पूर्ववाक्यं प्रयत्नतः । विचारयति येनासौ प्राड्विवाकस्ततस्स्मृतः ॥" इत्यादिस्मरणात् । 'द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शका' वित्यभिधानकोशाच्च व्यवहाराणां निर्णेतरि प्राड्विवकशब्दस्य योगरूढिनिश्चयात् । निश्चितार्थानुसारेण यथाकथञ्चित् तत्रैव व्युत्पादनावश्यम्भावात् गत्यन्तराभावेन तथाविधव्युत्पत्त्याश्रयणेऽपि शब्दस्वारस्येनैव निर्णीतऽर्थे आदेशपदे तादृशक्लिष्टकल्पनाया निर्मूलत्वात् । एवं छान्दोग्यश्रुतसंवर्गशब्देऽपि 'वायुर्वावैतान् संवृङ्क्त' इति श्रुत्यनुसारेण तदङ्गीकारो बोध्यः । तथा सोमप्रवाकशब्देऽपि 'महन्मेवोच' इत्यादि-मंत्रलिङ्गादिति बोध्यम् । न च त्वन्मतेऽपि कर्मणि घञ् न सम्भवति 'अकर्तरि चे' ति (पा. सू. ३-३-१९) सूत्रेण संज्ञायामेव तद्विधानादिति वाच्यम् । 'चकारस्य भिन्नक्रमत्वमाश्रित्य संज्ञायामपीति' पदमञ्जर्यादावुक्तत्वात्, 'संज्ञाग्रहणानर्थक्यं सर्वत्र घञो दर्शना' दिति वार्तिकोक्तेः, को भवता लाभो लब्ध इत्यादिप्रयोगोपपत्तये असंज्ञायामिति प्रश्लेषोऽपि कार्य इति कैश्चित् शाब्दिकैरुपवर्णनाच्च । तस्मादस्मदभिमतार्थे क्लेशलेशोऽप्यनाशंक्य एवेति दिक् ।

यत्त्वादेशपदस्योपदेशार्थकत्वे 'आदेच उपदेशेऽशिति' (पा. सू. ६-१-४५) 'उपदेशेऽजनुनासिक इत्' (पा सू. १-३-२) 'उपदेशेऽत्वतः' (पा. सू. ७-२-६२)

इत्यादिसूत्रेषु उपदेशपदं विहायादेशपदमेवार्धमात्रालाघवानुसारेणोच्चारयेत् । तस्मात् तस्य तदर्थत्वं नास्तीति जल्पितम् । तदसत् । "अव्ययीभावे शरत्प्रभृतिभ्य" इति (पा. सू. ५-४-१०७) सूत्रे शरदादिभ्य इति वक्तव्ये प्रभृतिग्रहणात् पर्यायपदेषु गौरवलाघवचिन्ता नास्तीति ज्ञापितत्वेन उक्तागमकसम्भवात् । अन्यथा त्रिकल्पार्थकवाशब्दस्यैव लाघवेन प्रयोक्तव्यत्वात् ॥

इति सद्विद्याविलासव्याख्यायां रसानुभूत्याख्यायां
प्रथमखण्डार्थसंग्रहः ॥ श्रीसांबशिवार्पणमस्तु ॥

अथ द्वितीयखण्डार्थसंग्रहः

(अ. का.) एवं प्रसंगागतं आदेशपदार्थविचारं परिसमाप्य इदानीं क्रमप्राप्तं सदेवेत्यादिद्वितीयखण्डार्थं संगृह्णाति । **सृष्टेः पूर्वमिति** ॥

(मू.) **सृष्टेः पूर्वं सदेवाभवदिदमखिलं न त्वसद्वादयोगः**
भेदैस्तद्वस्तुतस्तु त्रिभिरपि विधुरं माययाऽथापि युक्तम् ।
सङ्कल्प्य स्वस्य नानाभवनमजनयद्भूततेजोम्बुपृथ्वी-
रित्युक्ताद्वैतमारम्भणनयत उपापादि तत्वं द्वितीये ॥१२॥ इति

(व्या.) मृदादिविज्ञानात् घटशरावादिविज्ञानवत् आदेशशब्दितब्रह्मविज्ञानात् सर्वविज्ञानं पूर्वखण्डेऽभिहितम् । तत्र मृदादीनां घटादिकारणत्वात् कारणभूतमृदादिज्ञानात् कार्यभूतघटादिज्ञानस्य युक्तत्वेऽपि ब्रह्मज्ञानात् कथं सर्वज्ञानमित्याशंक्य तस्य सर्वकारणत्वं वक्तुं 'सदेवे'त्यादिश्रुतिः प्रवृत्ता । तत्र सदित्यनेनास्तितामात्रं वस्तु "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं" 'साक्षी चेता केवलो निर्गुणश्च' 'अस्तीत्येवोपलब्धव्यः' "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिवेदान्तवाक्येभ्यः प्रतिपन्नं ब्रह्म विवक्षितम् । इदमिति प्रत्यक्षादिप्रमाणावगतं जगदुच्यते । इदंतया दृश्यमानं सकलं जगत् अग्रे सृष्टेः पूर्वकाले सदेव आसीत् इति सम्बन्धः ॥

श्रुतावग्रे इत्यत्र कस्मात् पूर्वकाले इत्यपेक्षानुरोधात् सृष्टेरिति पंचम्यन्तपूरणम् । पूर्वमिति द्वितीया तु 'पूर्वं प्रधूमितो राज्ञा' मितिवत् 'कालाध्व-

नोरत्यन्तसंयोग' इति (पा. सू. २-३-५) सूत्रेण कृता। आसीदिति लङन्ता-सधातोरभवदिति लङन्तभूधातुना विवरणम्। ननु सृष्टेः पूर्वं सदासीति कथमुच्यते। इदानीमपि इदं जगत् अस्तीति प्रतीतेस्सदात्मकमेव। तथा च कार्यस्योपादानव्यतिरेकेण स्वतन्त्रेण सत्वानुपपत्तेः कालत्रयेऽपि जगतः सदात्मकत्वे सिद्धे अग्रे इति विशेषणमनर्थकमव्यावर्तकत्वात् इति चेन्न। न ह्यग्रे सदिति सच्छब्देन तस्यान्वयः, येनेदानीं सदात्मकत्वं न स्यात्। किंत्वेवकारार्थेन इदं-शब्दबुद्धिविषयत्वनिषेधेनान्वयः। ततश्चाग्रे इदंशब्दबुद्धिविषयत्वं नास्ति। इदानीं तु सच्छब्दबुद्धिविषयत्ववदिदंशब्दबुद्धिविषयत्वमप्यस्तीति सिध्यति। न हि प्रलयकाले जगतः अभिव्यक्तनामरूपविशेषवत्वं, येनेदमिति ग्रहीतुं शक्यं, नामरूपयोः कारकव्यापाराधीनत्वदर्शनात्। कारणात्मना सदात्मत्वन्तु स्वाभा-विकम्। तत् सृष्टेः प्राग्गृहीतुरभावेऽपि सृष्टयनन्तरं तदनुमानेन ग्रहीतुं शक्यम्। न त्वसद्वादयोग इत्यनेनासद्वादे युक्तिर्नैवास्तीत्यर्थकेन 'तद्धैक आहु' रित्यारभ्य 'तस्मादसतस्सज्जायत' इत्यन्तश्रुतिवचनेन प्रतिपादितस्यासद्वादस्य 'कुतस्तु खलु सोम्यैवं स्यादिति होवाच। 'कथमसतस्सज्जायेते' इति निरासकयुक्तिर्या श्रुतिप्रतिपन्ना सात्र संगृहीता। तद्ब्रह्म सजातीयविजातीयस्वगतभेदरूपैस्त्रि-भिर्धर्मैः विधुरं शून्यम्। भिद्यत इति भेदः ब्रह्मभिन्नमित्यर्थः। ब्रह्मभिन्नं च त्रिविधं प्रसक्तं सजातीयं विजातीयं स्वगतं चेति। चेतनत्वेन ब्रह्मसजातीयस्य जीवस्य जडत्वेन विजातीयस्य प्रपञ्चस्यानेकरसत्वेन शाखास्कन्धपुष्पफलपल्ल-वादिविशिष्टवृक्षस्येव प्रसक्तस्य ज्ञानानन्दादिधर्मस्य चेत्येवं त्रिविधभेदस्य राहि-त्यमत्र बोध्यते। तदुक्तं:—'वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः। वृक्षान्तरात्सजातीयः विजातीयश्शिलादितः'॥ तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते। एकावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमादि' ति। तच्च जीवस्य ब्रह्म-भेदांगीकारेण प्रपञ्चस्य मिथ्यात्वांगीकारेण ब्रह्मणश्च सैन्धवघनवत्प्रज्ञानरसत्वां-गीकारेण चोपपद्यते। इदमुपलक्षणं 'एकमेवाद्वितीय' मिति वाक्यस्थाद्वितीयपदेन द्वितीयमत्र नास्तीत्यर्थकेन ब्रह्मभिन्नत्वरूपद्वितीयत्वावच्छिन्नप्रतियोगिताकाभावो बोध्यते। एकमेवेति पदद्वयन्तु सङ्कोचशङ्कापरिहारायेत्यपि वक्तुं शक्यम्, एवं च 'भेदैस्तद्वस्तुतस्तु त्रिभिरपि विधुरमि' त्यंशेनाध्याहृततच्छब्दयुक्तस्य 'एक-मेवाद्वितीय' मिति श्रुतिवाक्यस्यार्थस्संगृहीतः। ननु 'कर्ता शास्त्रार्थवत्वात्'

(ब्र. सू. २-३-१४-३३) 'शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् तस्मात्स्वयं प्रयोगे स्यात्' (जै. सू. ३-७-८-१८) इति सूत्रोक्तन्यायेन कर्तृत्वभोक्तृत्वादेर्जीवधर्मत्वात्तस्य चासङ्गोदासीनब्रह्माभेदांगीकारे कर्तृत्वादेर्लोपापत्या यागदानहोमादिप्रापकशास्त्राणामानर्थक्यप्रसङ्ग इत्यत आह। वस्तुतस्तु इति। परमार्थतस्त्वित्यर्थः। पारमार्थिकभेदनिषेधेऽपि आब्रह्मज्ञानमौपाधिकव्यावहारिकभेदानुवर्तनेन यागादिप्रापकशास्त्राणां प्रामाण्योपपत्तिरिति भावः। माययेत्यादि। तन्मायोपहितं सत् स्वस्य प्रपञ्चरूपेण नानाभवनं सङ्कल्प्य भूततेजोम्बुपृथ्वीरजनयत्। अत्र भूतपदमाकाशवायुपरं, आकाशं वायुं च सृष्ट्वेति भाष्यानुसारात्। अथवा भूतपदं त्रिवृत्कृतभूतपरं सत् तेजोंबुपृथिवीनां विशेषणं त्रिवृत्करणस्य तृतीयखण्डे वक्ष्यमाणत्वात्। ननु सदेवेत्यादिवाक्येन सृष्टिप्रतिपादनस्य किं फलमिति विवेक्तव्यम्। न तावद्ब्रह्मणः स्वस्रष्टत्वरूपमहिमज्ञानं प्रयोजनं, तस्य मुक्तावनुपयोगादद्वितीयात्मज्ञानस्यैव तद्धेतुत्वाच्च। नापि ब्रह्मणोऽद्वितीयत्वप्रतिपत्तिः प्रयोजनं, सृष्टयनुपन्यासेऽपि 'नेह नानास्ती' ति वाक्यात् निष्प्रपञ्चब्रह्मबोधनोपपत्तिरिति चेन्न। 'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यत' इति न्यायेनापवादापेक्षिताध्यारोपपरत्वेन सृष्टिवाक्योपपत्तेः। एवञ्च 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र. सू. १-१-६-१४) इति सूत्रभाष्योक्तन्यायैः कारणव्यतिरेकेणाभावरूपकारणानन्यत्वस्य प्रपञ्चे प्रतिपादनात् निष्प्रपञ्चब्रह्मरूपमद्वैतत्वमुपापादि। उपपूर्वात्पद्यतेर्णिजन्तात्कर्मणि चिण्। भाष्ये तु अद्वितीयपदेन द्वितीयस्य जगदुपादानसद्रूपव्यतिरिक्तनिमित्तकारणस्य जगत्कर्तुर्निषेधप्रतीत्याऽभिन्ननिमित्तोपादानत्वसिद्धिरित्युक्तं, तत्तु सङ्कल्प्य स्वस्य नानाभवनमित्युत्तरार्धेन तस्य लभ्यमानतया 'एकमेवाद्वितीय' मिति वाक्यार्थत्वेन न संगृहीतम्।

इति द्वितीयखण्डार्थसंग्रहः

अथ तृतीयः खण्डः

(अ. का.) ननु पूर्वस्मिन्श्लोके भूतत्रयस्य सत्कार्यत्वोक्त्या सद्ज्ञानेन भूतत्रयस्य ज्ञाने सत्यपि भौतिकानामण्डजादिशरीराणां सत्कार्यत्वासिध्या सजातीयपक्ष्यादिशरीरजन्यत्वदर्शनेन च कथमेकविज्ञानेन सर्वविज्ञानमित्याशंक्य

स्वजन्यत्रिवृत्कृतभूतद्वारा सत्कार्यत्वमस्तीति वक्तुं तृतीयखण्डः प्रवृत्तः । तदर्थं संगृह्णाति—

(मू.) एकैकं तच्च भूतं त्रिवृदियमकरोद्वीक्ष्य सा देवतादौ
जीवेनानुप्रविष्टा वपुरित उदितं व्याकरोन्नामरूपे ।
भूतद्वारा सदुत्थं त्रिविधवपुरिदं स्वस्वजातीयजातं
सज्ज्ञानात् सर्वधीः प्रागकथि तदुचितेत्येवमर्थस्तृतीयः ॥१३॥

(व्या.) सेयं देवता आदौ सर्गादिकाले एकैकं भूतं त्रिवृत्करवाणीति संकल्प्य त्रिवृत्त्रिवृदकरोत् । श्रुतिस्थहन्तपदविवरणं आदाविति । 'तासां त्रिवृतं त्रिवृतमेकैकां करवाणी' ति विवरणीयश्रुतौ त्रिवृत्पदे वीप्साश्रवणानुरोधेनात्रापि वीप्सया विवरणम् । त्रिवृत्करणप्रकारश्च एकैकं भूतं द्विधा द्विधा कृत्वा एकैकमर्धं पुनः द्विधा कृत्वा तयोरंशयोरितरयोर्भूतयोः प्रक्षेपे स्वकीयो भागः अर्धमितरयोः पादमात्रमिति एकस्य प्राधान्यमितरयोस्तु स्वल्पत्वाद्गुणभाव इति । इदं च पञ्चीकरणस्याप्युपलक्षणम् । तदपि चेत्थं, पञ्चसु भूतेषु मध्ये एकैकभूतं द्विधा द्विधा कृत्वा एकैकमर्धं पुनश्चतुर्धा कृत्वा चतुर्णामंशानां भूतचतुष्टयार्धेषु प्रक्षेपे तत्राप्येकैकस्य प्राधान्यमितरेषां चतुर्णां गुणभाव इति ॥ ननु मूले एकैकमिति त्रिवृत्त्रिवृदिति च वीप्साश्रवणात् प्रतिभूतं त्रिवृत्करणं विज्ञायते तदुपेक्ष्य समुदितभूतत्रयस्यैवैकं त्रिवृत्करणमस्त्विति चेन्न । तथासति नीलरक्तशुक्लरूपतन्तुनिर्मितरज्जुवत् समप्रधानमेव स्यात्, तथा च पृथङ्नामप्रत्ययलाभाभावः तादृशपृथङ्नामप्रत्ययलाभमूलकव्यवहारासिद्धिश्च प्रकाशादिकार्यसङ्करश्च प्रसज्येत । अतः प्रागुक्तत्रिवृत्करणादिकमेवावश्यमाश्रयणीयं, तथा सति गुणप्रधानभावलाभेन 'वैशेष्यात्तु तद्वादस्तद्वाद' (ब्र. सू. २-४-९-२२) इति सूत्रोक्तन्यायेन च व्यवहारासिध्यादिदोषाप्रसक्तिः । ननु प्रथमं तावन्नामरूपव्याकरणं पश्चात्त्रिवृत्करणं च श्रुतौ प्रतीयते तथा तत्सङ्कल्पोऽपि । कथमिह श्लोके वैपरीत्येनोपन्यसनमिति चेदुच्यते । पाठक्रमापेक्षयार्थक्रमबलीयस्त्वस्य [1]पञ्चमे 'अग्निहोत्रं जुहोति यवागूं पचती' त्यादौ स्थापितत्वेन श्रुतावप्यर्थक्रमस्या-

---

[1] जैमिनीयमीमांसाशास्त्रे पञ्चमे अध्याये ।

वश्यमाश्रयणीयत्वेन तद्विवरणभूतपद्येऽपि तथाश्रयणीयमिति भावः। इतः त्रिवृत्कृतभूतत्रयादुदितमुत्पन्नं वपुर्हैरण्यगर्भं वैराजं पिण्डं देवशरीराणि चानुप्रविष्टा भूतमात्रासंसर्गेण लब्धविशेषविज्ञाना सती वीक्ष्येत्यनुषङ्गेण सङ्कल्पपूर्वकं नामरूपे व्याकरोदित्यन्वयः। "ननु न युक्तमिदमसंसारिण्याः सर्वज्ञायाः देवतायाः बुद्धिपूर्वकमनेकशतसहस्रानर्थं सश्रयं देहमनुप्रविश्य दुःखमनुभविष्यामीति सङ्कल्पनं स्वातन्त्र्ये सत्यनुप्रवेशश्चेत्यतद् आह—जीवेनेति। जीवो नाम देवताया आभासमात्रं बुध्यादिभूतमात्रासंसर्गजनितः आदर्शे इव प्रविष्टः पुरुषप्रतिबिम्बः जलादिष्विव च सूर्यादीनाम्। तथा च प्रतिबिम्बस्य उपाधिधर्मानुविधायित्वेऽपि बिम्बभूतसदाख्यदेवतायाः तत्सम्बन्धाभावात् नोक्तानुपपत्तिः। ननु जैवेन रूपेण शरीरमनुप्रविश्य नामरूपव्याकर्तृत्वस्वीकारे 'संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशा' (ब्र.सू. २-४-९) दित्यधिकरणविरोधः। तत्र त्रिवृत्कुर्वतः परमेश्वरस्य संज्ञामूर्तिक्लृप्तिसंज्ञितनामरूपव्याकरणकर्तृत्वप्रतिपादनादिति चेन्न। जीवद्वारा तद्व्याकर्तृत्वोपपत्तेः। तेषां खल्वेषां भूतानामित्यवान्तरवाक्यार्थं संगृह्णाति। भूतद्वारेति तृतीयचरणेन। त्रिविधं वपुश्चाण्डजं जीवजमुद्भिज्जमिति। अण्डजं पक्षिसर्पादि। जीवन्त्यां मातरि जायमानत्वाज्जीवजशब्देन जरायुजमुच्यते। उद्भिज्जं उद्भिनत्तीत्युद्भित् अंकुरादि तज्जातित्वाद्वृक्षादि उद्भिज्जम्। तच्च विशिनष्टि। स्वस्वजातीयजातमिति। पक्षिसर्पादि सजातीयशरीरेभ्यः मनुष्यपश्वादि मनुष्यपश्वादिभ्यः, चूतपनसादि चूतपनसादिभ्यः जातमिति वपुषस्त्रैविध्यं बोध्यम्। एवंविधशरीरत्रयस्य सद्ज्ञानात् ज्ञानं न भवतीत्याशंक्याह। भूतद्वारेति॥ तथा च सज्जन्यभूतजन्यत्वाच्छरीरत्रयस्य सज्ज्ञानाधीनज्ञानत्वमिति भावः। तत् तस्मादित्यर्थः। सज्ज्ञानात् सर्वधीः प्राक् याऽकथि सोचिता॥ १३॥

इति तृतीयखण्डार्थसङ्ग्रहः

अथ चतुर्थः खण्डः

(अ. का.) त्रिवृत्कृतभूतकार्याणि द्विप्रकाराणि। शरीराणि च बाह्यविषयरूपाणि च। तत्र तुर्यखण्डे प्रतिपादितबाह्यविषयस्य त्रिवृत्कृतभूतकार्यत्वं उदाहरणेन स्पष्टीक्रियते अग्न्यादेरिति—

(मू.) अग्न्यादेर्यद्धि रूपं जन उपलभते रोहितश्वेतकृष्णं
तत्तेजोऽबन्नरूपं तदिति तु ऋतमग्नित्वमग्नेरपागात् ।
आद्ये खण्डे यदुक्तं विकृतिरिह वचोगोचरो नाममात्रं
सत्योपादानतायुङ् मृदिति तदुदितं त्वत्रिवृद्गामि तुर्ये ॥१४॥

(व्या.) अग्न्यादेरिति । आदित्यचन्द्रविद्युतामादिशब्देन ग्रहणम् । तेजोऽबन्नरूपमत्रिवृत्कृततेजोऽबन्नरूपम् । तदनन्यत्वमिति न्यायादिति भावः । ननु अत्रिवृत्कृततेजोऽबन्नरूपस्यातीन्द्रियत्वात् कथमिह स्फुटतरं रोहितश्वेतकृष्णरूपस्य जनैरुपलभ्यमानत्वमिति चेन्न । तस्यैव रूपत्रयस्य त्रिवृत्कृतभूतत्रयस्थत्वेन प्रत्यक्षत्वसम्भवात् । एवञ्चात्रिवृत्कृतभूतरूपस्यैव सत्यत्वमित्याह—तदितीति । अग्नित्वमग्नेरपागादिति रूपत्रयव्यतिरेकेण या अग्नौ अग्नित्वबुद्धिः अग्निशब्दप्रयोगश्चासीत् तदिदानीं रूपत्रयविवेकविज्ञाने सति निवृत्तं वेदितव्यम् । अत्रात्रिवृत्कृतभूतरूपस्य त्रिवृत्कृतभूतगतत्वेन प्रतीयमानस्य सत्यत्वमित्यत्र प्रथमखण्डोक्तं मृत्तिकासत्यत्वं दृष्टान्तयति—आद्ये खण्ड इति । उपसंहरति—तदिति । तत् सत्यत्वमत्रिवृद्गामि तुर्ये खण्डे उदितमित्यर्थः ॥ १४ ॥

इति चतुर्थखण्डार्थसङ्ग्रहः

अथ पञ्चमः खण्डः

(अ. का.) त्रिवृत्कृतभूतकार्यत्वं रसासृङ्मांसमेदोऽस्थिमज्जाशुक्लानि धातव इति क्रमेण पिण्डस्य स्पष्टीक्रियते, पञ्चमखण्डे । तदर्थं संगृह्णाति—भुक्तेति—

(मू.) भुक्तान्नस्य स्थविष्ठं शकृदथ पिशितं मध्यमोऽंशस्त्वणिष्ठश्चेतोऽथ स्यादथापां क्रमश इह भवेन्मूत्ररक्तासुभावः ।
अस्थि स्नेहस्तदन्तर्गत उपरि च वाक्तेजसस्स्यात् घृतादेः
भुक्तस्येत्थं त्रिवृत्त्वं पुरुषमुपयतां पञ्चमेऽधीतमेषाम् ॥ १५ ॥

(व्या.) 'अन्नमशित' मिति श्रुतिभागः भुक्तान्नस्येत्यनेन गृह्यते। तस्य पच्यमानस्य त्रेधा विभज्यमानस्य स्थविष्ठमध्यमाणिष्ठास्त्रयो भागाः। तेषु प्रथमः पुरीषांशः। मध्यमस्तु मांसभागः। अणिष्ठस्तु मनोरूपेण परिणमति। तथा पीतानामपामपि पूर्ववत् त्रेधा विभज्यमानानां अंशत्रयमपि मूत्ररोहित-प्राणभावेन परिणमत इत्यर्थः। तथा तेजसोऽपि त्रिधा विभज्यमानस्य अंशत्रयमपि अस्थितदन्तर्गतस्नेहवाग्रूपेण परिणमंतीत्यर्थः। मज्जा तदन्तर्गतस्नेह इति भाष्यादिति भावः। अणिष्ठ इत्यत्राणिष्ठस्त्वित्यन्वयः। घृतादेस्तेजस्त्वं "तेजो वै घृत" मिति श्रुत्या हिरण्यमाज्यधर्मस्तेजस्त्वादिति तांत्रिकव्यवहारेण च बोध्यम्। पुरुषमुपयतामेषां तेषां त्रिवृत्कृततेजोबन्नानां त्रिवृत्वं त्रिप्रकारेण वर्तमानत्वं इत्थं एवंप्रकारेण पञ्चमखण्डे अधीतं समाम्नातमित्यर्थः।

इति पञ्चमखण्डार्थसङ्ग्रहः

अथ षष्ठसप्तमौ खण्डौ

(अ. का.) ननु त्रिवृत्कृतभूतत्रयकार्ये शरीरे मनःप्राणवाचामसङ्करेण तत्तद्भूतकार्यत्वं दुर्विज्ञेयं, अतो दृष्टान्तेन प्रदर्शनमभ्यर्थयमानं शिष्यमाहाचार्यः षष्ठखण्डेन। तमिममर्थं पूर्वार्धेन संगृह्णाति। दध्नस्सर्पिरिति॥

(मू.) **दध्नस्सर्पिर्यथोदीषति सति मथने सार ऊर्ध्वस्त्वणिष्ठः**
भूतानां तद्वदेषां भवति खलु मनःप्राणवाग्भाव इत्थम्।
उक्तं षष्ठेऽथ शक्तिर्मनस इह कलाः कल्पयित्वाऽथ तासा-
मन्नह्रासाभिवृध्योस्तदुभयकलनात् ख्यापितं तन्मयत्वम्॥

(व्या.) उदीषति उद्गच्छति। ईषतेर्गत्यर्थत्वात्। यथा दृष्टान्तेऽणिष्ठ-सारांशस्य नवनीतभावः, तथेहापि अन्नादिभूतानां मन आदिभाव इति षष्ठे खण्डेऽभिहितमित्यर्थः। यद्यपि मनःप्राणवाचामव्यतिरेकेण तत्तत्कार्यत्वे दृष्टान्तो-ऽभिहितः। तत्र प्राणवाचोस्तत्तत्कार्यत्वे सदृष्टान्तमवगतेऽपि मनसः अन्नकार्यत्वं पुनः दृष्टान्तेनोपपादयेति पृच्छन्तं शिष्यं प्रति सप्तमखण्डेन सदृष्टान्तमुपपाद-यति। तदर्थमुपदर्शयति श्लोकोत्तरार्धेन। अथ शक्तिरिति। अथेति सप्तमखण्ड-

विवरणप्रारम्भद्योतनार्थः । अन्नोपचिता मनश्शक्तीः कलात्वेन कल्पयित्वा तासां शक्तीनां अन्नाशनानशनयोस्सतोरुपचयापचयदर्शनात् अन्नमयत्वं मनसः "षोडशकलस्सोम्य पुरुष" इति सप्तमखण्डे प्रकाशितमित्यर्थः ॥ १६ ॥

इति षष्ठसप्तमखण्डार्थसंग्रहः

अथ अष्टमः खण्डः

(अ. का.) ननु सद्विज्ञानत् सर्वविज्ञानं प्रागुक्तम् । तन्न सङ्गच्छते । सत्कार्याणां तेज आदीनां तज्ज्ञानेन ज्ञातत्वेऽपि तदकार्याणां जीवानां तदज्ञानेन ज्ञानासम्भवात् । न च—'अनेन जीवने' ति वाक्येन जीवस्य सदाख्यदेवताऽभेदोक्त्या जीवज्ञानमपि सुलभमिति वाच्यम् । नाहमीश्वर इति प्रत्यक्षादिविरुद्धस्याभेदस्य उपपत्तिं विना उपदेशमात्रेण ज्ञातुमशक्यत्वादित्यत उपपत्तिप्रदर्शनार्थं प्रवृत्तस्याष्टमखण्डस्यार्थं संगृह्णाति । यत्र स्वात्मनीति—

(मू.) यत्र स्वात्मन्यपीतस्सुखमयति जनो दुःखमुक्तस्सुषुप्तौ
तेजोवार्यन्नकार्ये वपुषि भवति यन्मूलमस्मिन्प्रणाल्या ।
अत्रोदन्याशनायास्वपितिपदनिरुक्त्या हि लोकोऽपि मानं
शुद्धो जीवस्तदात्मा सुखचिदधिगतस्त्वष्टमे स्पष्टमेषः ॥ १७ ॥

(व्या.) यत्र सदाख्यदेवतारूपस्वात्मनि स्वस्वरूपभूते अपीतः अप्ययं गतः । उपाध्युपरमे औपाधिकभेदनिवृत्या ऐक्यं गत इत्यर्थः । एवम्भूतस्सुखमयति सुखं प्राप्नोति । दुःखमुक्तश्च भवति । बृहदारण्यकषष्ठे तृतीयब्राह्मणे 'तद्यथाऽस्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तस्संहृत्य पक्षौ सल्लयायैव ध्रियते एवमेवायं पुरुष 'एतस्मा अन्ताय धावति यत्र सुप्तो न कश्चन स्वप्नं पश्यती' ति श्रवणेनात्रापि 'स यथा शकुनि' रित्यादिना च सुप्तिकाले जाग्रत्स्वप्नानेकव्यापारजन्यदुःखमुक्तत्वावगमात् । तथा सुखप्राप्तिरपि 'आनन्दो ब्रह्मेति व्यजानात्' इति 'एषोऽस्य परम आनन्द' इति च श्रुत्या सदाख्यदेवतायास्सुखरूपत्वावगमात् 'सुखमहमस्वाप्स' मिति सुप्तोत्थितस्य परामर्शाच्च युज्यते । त्रिवृत्कृततेजोऽबन्नकार्येऽस्मिन् शरीरे अन्नवारितेजोरूपकारणपरम्परया सन्मूलकारणं भवतीति द्वितीयपादार्थः । 'अशनापिपासे' इति

श्रुत्यर्थं उपादत्ते अत्रोदन्येति । स्वपिति पदस्य प्राङ्निरुक्तिवदशनायोदन्यापदयोः 'अथ यत्रैतत्पुरुषोऽशिशिषति नाम आप एव तदशितं नयन्ते । तद्यथा 'गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षते अशनायेति' । 'अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्टे उदन्येति' च भागद्वयेन निर्वचनात् । तत्र च अशं नयन्तीत्यशनायेति विसर्गलोपेनाप उच्यन्ते ता हि अशितमन्नं द्रवीकुर्वन्त्यस्सर्वतो नयन्तीति । जाठरं तेजोऽपि पीता उदकशब्दवाच्या 'अपश्शोषयती' ति च गोनायादिशब्ददृष्टान्तेन विवरणात् । इत्थञ्च सति द्रवीकृतस्याशितस्य सर्वतो नयनेन पुनर्बुभुक्षा जायत इति पीतानां चापां तेजसा भृशं शोष्यमाणत्वात् पिपासापि जायत इति च लोकानुभवसिद्धम् । तदिदमुक्तं लोकोऽपि मानमिति । महावाक्यार्थमाह । शुद्धो जीव इति । शोधितः देहेन्द्रियाहङ्कारेभ्यः विनिष्कृष्टस्त्वमित्यर्थः । जीवः सुखचिदिति तस्य विशेषणं, सुखञ्चासौ चिच्चेति कर्मधारयः । एषः सद्रूपः "अहमस्मि सदा भामि कदाचिन्नाहमप्रिय" इत्यभियुक्तोक्तेः सत्यज्ञानानन्दस्वरूप इत्यर्थः । तदात्मासि सच्चासावात्मा च स तदात्मा तत्पदवाच्यतावच्छेदकसर्वज्ञत्वाद्युपलक्षितात्मस्वरूपोसीति महावाक्यार्थः । एतेन नाहमीश्वर इति भेदप्रत्यक्षस्य विशिष्टविषयकत्वेन विशिष्टाभेदविरोधित्वेऽपि उपलक्षिताभेदे विरोधाभावेन उपपत्तिरुक्ता ।

अत्र स्पष्टमित्यनेन [1]मतान्तरसिद्धमहावाक्यार्थस्य क्लिष्टत्वं सूच्यते । तथा हि तन्मते 'अनृक्षरा ऋजवस्सन्तु पन्था' इत्यत्र बहुवचनस्य यथा स्वादेशः, यथा 'उत यत्सुन्वन्ति सामिधेनीस्तदाह' इत्यत्र यत्तद्भ्यां सप्तम्याः लुक् । 'सुपांसुलुगि' ति (पा. सू. ७-१-३९) सूत्रेण, यथा वा 'गायत्री छन्दसां माते'-त्यत्र विभक्तिव्यत्ययः 'व्यत्ययो बहुल' मिति (पा. सू. ३-१-८५) सूत्रेण, तथा 'तत्त्वमसी' त्यत्रापि चतुर्थ्याः स्वादेशादीनामन्यतममाश्रित्य तस्मै त्वमर्पणीय इत्यर्थो वा 'ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीते' ति श्रुतेः । पञ्चम्या वा स्वादेशादीनामन्यतमं स्वीकृत्य तस्मात् त्वमुत्पन्न इत्यर्थे

1 दशप्रकरणकर्तुरानन्दतीर्थाचार्यस्य मतमत्र मतान्तरमित्युक्तम् ।

इति वा 'यतो वा इमानी' ति श्रुतेः। षष्ठ्या वा तत्त्रितयं स्वीकृत्य तत्स्वामिकोऽसीत्यर्थ इति वा 'स कारणं करणाधिपाधिप' इति श्रुतेः। सप्तम्या वा तत्त्रितयं स्वीकृत्य तस्मिन् प्रतिष्ठितः त्वमसीत्यर्थो वा 'सदायतनास्सत्प्रतिष्ठा' इति श्रुतेः। 'अघोरा पापकाशिनी' ति अकारप्रश्लेषवत् 'अतत्वमसी' ति वा 'आत्मा तत्त्वमसी' त्यत्र प्रश्लेषमाश्रित्य तद्भिन्न इत्यर्थो वा इत्येवं पञ्चधा व्याख्यानमपि क्लिष्टमेव भवति। प्रकृतमहावाक्ये तस्मा इति पक्षे अर्पणीय इति, तस्मादिति पक्षे उत्पन्न इति च, तस्मिन्निति पक्षे प्रतिष्ठित इति च, तत्तत्पदाध्याहारे गौरवात् मानाभावाच्च। तस्येति पक्षे राहोश्शिर इतिवत् 'अयमात्मा ब्रह्मे 'ति श्रुतिमनुसृत्य अभेदस्यापि षष्ठ्यर्थसम्भवे स्वामित्वार्थ इत्यत्र नियामकाभावात्, 'स आत्मा तत्वमसी' त्यकारप्रश्लेषे ईश्वरभेदस्य नाहमीश्वर इति प्रत्यक्षसिद्धत्वेन श्रुत्या तद्बोधनेऽनुवादकत्वापत्त्या वाक्यवैय्यर्थ्यापत्तिश्चेति ॥ १७ ॥

(अ. का.) ननु पूर्वस्मिन्श्लोके महावाक्यस्थले तत्पदस्य स्वाद्यन्यतममाश्रित्य चतुर्थ्यन्तत्वाद्यन्यतमकल्पनेऽध्याहारादिक्लेशसद्भावेऽपि शरीरशरीरिभावकृतसामानाधिकरण्यपक्षाश्रयणे[1] न दोष इति पराशङ्कां निरस्यन्नाह—शब्द इत्यादि।

(मू.) शब्दो देहाभिधायी कथमपि लभतां देहिपर्यन्तवृत्तिं
त्वं शब्दार्थं विशेष्यं त्वसिरिह घटयन् भेदिपक्षं छिनत्ति।
गौणं तत्त्वं समानाधिकरणपदयोर्नैव युक्तं विरोधा-
दभ्यासादेस्तदादेस्तदिह समुचितो ब्रह्मजीवैक्यमर्थः ॥ १८ ॥

(व्या.) तेषामयमाशयः लोके तावन्नीलादिशब्दाः गुणे गुणिनि च प्रयुज्यमानाः अनुपपत्तिप्रतिसन्धानं विनापि गुणिबोधनात् उभयत्र शक्तिमन्तः, तथा च नीलादिशब्दानामपृथक्सिद्धगुणत्वेन प्रकारवाचित्वं अपृथक्सिद्धगुणत्वञ्च तेन सह तस्य भवति। यो यस्माद्विश्लिष्य न तिष्ठति, यथा नीलादयश्च द्रव्याद्विश्लिष्य न तिष्ठन्ति। यथा देवदत्तादिशरीरमपि आत्मविश्लेषेण न तिष्ठतीति अपृथक्सिद्धं भवतीत्यतो नीलादिशब्दानां नीलगुणविशिष्टवाच-

[1] अयं पक्षः विशिष्टाद्वैताचार्यस्य रामानुजाचार्यस्येति बोध्यं।

कत्ववत् शरीरवाचिशब्दानां शरीरिपर्यन्तत्वं सिद्धम् । प्रकारवाचिनां प्रकारि-पर्यन्तत्वनियमात् । तथा च 'यस्य पृथिवी शरीरं, यस्यापश्शरीरं, यस्यात्मा शरीर' मित्याद्यन्तर्यामिब्राह्मणपर्यालोचनया चेतनाचेतनात्मकसकलप्रपञ्चस्यापि भगवच्छरीरत्वावगमात् सर्वेषां तत्तत्पदार्थवाचिशब्दानां भगवत्परत्वमिति जीववाचिशब्दानामपि जीवशरीरकपरमात्मपर्यन्तत्वमिति । एवं परमतसिद्धोऽर्थोऽनूदितः प्रथमपादेन । परोक्तपक्षे कथमपीत्यनेनाऽस्वरसस्सूचितः । स चेत्थम् । प्रकारशब्दानां प्रकारिपर्यन्तत्वमिति नियमो न सम्भवति । शरीरादि-सम्बन्धानामपि प्रकारवाचित्वेन शरीरिपर्यन्तत्वस्य रूपादिशब्दानां रूपिपर्यन्त-त्वस्य च प्रसङ्गात् । न च नीलादिशब्दानां ब्राह्मणादिशब्दानां च घटादिद्रव्ये आत्मनि च नीलत्वब्राह्मणत्वादेः नीलो घटः ब्राह्मणोऽहमित्यादिप्रतीत्या परम्परासम्बन्धः आधारतानियामक इति वाच्यम् । नीलो घटः ब्राह्मणोऽहमिति प्रतीतिस्थले घटे नीलः नीले नीलत्वं आत्मनि च ब्राह्मणशरीरं ब्राह्मणशरीरे च ब्राह्मणत्वमिति विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति रीत्या भासते न तु नीलत्वजातेः स्वाश्रयगुणाश्रयत्वसम्बन्धेन घटे भानम् । तत्र मानाभावात् । तथा स्वीकारेऽपि नीलिमेत्यादीमनिच्प्रत्ययान्तानां नीलगुणवाचित्वेन प्रकारवा-चित्वात् प्रकारिपर्यन्तत्वापत्तिः । न हि नीलो घट इतिवत् नीलिमा घट इति प्रयुज्यते । तत्र इमनिजन्तस्य नीलादिशब्दस्येव गुणविशिष्टवाचित्वाभावात् । ब्राह्मणो यजत इत्यत्र तु ब्राह्मणशब्दस्य शरीरमात्रवाचित्वेऽपि अहं ब्राह्मण इत्यादितादात्म्याध्यासमूलकात्मविशेष्यकभ्रान्तिमादाय सामानाधिकरण्यमिदं रजतमित्यादिवदुपपन्नम् । न च तर्हि ब्राह्मणो यजत इत्यादिशास्त्रस्य भ्रम-जनकत्वेनाप्रामाण्यमिति वाच्यम् । तस्य लोकसिद्धभ्रमानुवादित्वेनाप्रामाण्या-भावात् । यथा मेरुं प्रदक्षिणीकुर्वन्नपि आदित्यस्समुद्रतीरवासिनां समुद्रादुद्गत इव भातीति तद्भ्रमसिद्धं समुद्रादुद्गतत्वं 'य उदगान्महतोऽर्णवा' दिति श्रुत्या अनूद्यते तद्वत् । लभतामिति लोट् कामचारानुज्ञायाम् । एवं परमतसिद्धशरी-रशरीरिभावकृतसामानाधिकरण्यस्य महावाक्येऽभ्युपगमेऽपि परेषामभिमतार्थो न सिध्यतीत्याह—त्वंशब्दार्थमिति द्वितीयचरणेन । त्वंशब्दार्थं जीवं विशेष्यं समर्पयन्नसीति शब्दो भेदिपक्षं रुणद्धि । अत्रासिरिवासिरिति गुणवृत्या छेदनसाधनत्वमपि गम्यते, तथा हि परमते 'तत्त्वमसी' ति वाक्यं यथा-

श्रुतार्थं न सम्भवति । न ह्यत्र त्वंशब्दस्य ईश्वरशरीर इति जीववाचकस्येश्वरे वृत्तिरभ्युपेयते । त्वंशब्दार्थस्य तच्छब्दे विशेषणत्वाभावात् । किं तु तच्छब्दस्यैव प्रकृतपरामर्शकस्य त्वंशब्दार्थेऽभेदसम्बन्धेन विशेषणसमर्पकता । अन्यथाऽसीति मध्यमपुरुषो न स्यात् । त्वंशब्दार्थस्येतरविशेषणत्वे आकांक्षाभावेन आख्यातसामानाधिकरण्यायोगात् । युष्मच्छब्दस्याख्यातसामानाधिकरण्य एव 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यम' (पा. सू. १-४-१०५) इति सूत्रेण मध्यमपुरुषो विधीयते । अतस्त्वंशब्दार्थस्य विशेष्यत्वमभ्युपेतव्यम् । तत्र च परमात्मपरस्य तच्छब्दस्य शरीरवाचकानां शरीरिपर्यन्ताभ्युपगमोऽपि न सम्भवति । ईश्वरस्य जीवं प्रति शरीरत्वाभावात् । अतो मध्यमपुरुषोपपत्तये त्वंशब्दार्थविशेष्यकमेव सामानाधिकरण्यमुपेयम् । एवमहं ब्रह्मास्मीति सामानाधिकरण्यमपि उत्तमपुरुषोपपत्तये जीवविशेष्यकमेव स्वीकर्तव्यम् । दृश्यते हि त्वमहं शब्दार्थयोः विशेषणविशेष्यभावव्यत्यासे मध्यमोत्तमपुरुषयोः व्यत्यासः । त्वं वा अहमस्मि भगवो देवते, अहं वै त्वमसीति व्यतिहारवाक्ये । तथाऽन्यत्रापि 'यदग्ने स्यामहं त्वं त्वं स्या अहं स्युष्टे सत्या इहाशिष' इति । ततश्चासीति पदानुसारेण त्वंशब्दार्थविशेष्यके सामानाधिकरण्ये स्थिते शरीरवाचकानां शब्दानां शरीरिपर्यन्तत्वमिति व्युत्पत्युपगमेऽपि स्वारस्यहानेरवर्जनीयतया अष्टमखण्डवाक्यावसरप्रदर्शितवचनव्यक्तिभिर्व्यामोह एव प्राप्नोतीति जीवब्रह्मणोः स्वरूपाभेदमुपेत्यैव यथाश्रुतार्थोऽभ्युपेतव्यः । ननु सिद्धान्तेऽपि एकधर्मिपर्यवसिततया त्रयाणां पदानामखण्डार्थत्वाभ्युपगमेन मध्यमपुरुषस्वारस्यं परित्यक्तमेव सर्वेषां पदानां लक्षणोपगमादिति चेत् । न ह्येतावता मध्यमपुरुषप्रयोगोऽसाधुर्भवति । आलम्बनीभूतवाच्यार्थेऽभेदसंसर्गेण तत्पदार्थप्रकारकत्वंपदार्थविशेष्यकबोधाभ्युपगमेन मध्यमपुरुषोपपादनसम्भवात् । इत्थमेव हि स्तुतिपर्यवसितेष्वर्थवादेषु मध्यमादिपुरुषाणां गतिरिति [1]लक्ष्मणार्यमतं निरस्य, माध्वानां मतानुसारेण महावाक्यार्थवर्णनप्रकारोऽप्ययुक्त इत्याह—गौणं तत्त्वमिति । समानाधिकरणपदयोस्तत्त्वंशब्दयोस्सामानाधिकरण्यं गौणम् । अग्निर्माणवक इतिवत् । तन्मते 'पृथगुपदेशा' दित्यधिकरणे तत्त्वमस्यादिवाक्यस्य जीवब्रह्माभेदपरत्वं पूर्वपक्षयित्वा 'भिन्नोऽचिन्त्यः परमो जीवसंघातात्मात् पूर्णः

---

[1] लक्ष्मणार्यः रामनुजाचार्य इत्यर्थः ।

परो जीवसंज्ञो ह्यपूर्णः। यतस्त्वमसौ नित्यमुक्तो ह्ययं च बद्धो मुक्तिं तत एवाभिवांछती' ति सोपपत्तिककौशिकश्रुत्या विरुद्धत्वात् तत्त्वंपदयोर्गौणं सामानाधिकरण्यं चेतनत्वगुणयोगेन सिद्धान्तितत्वादिति। अथवा गौणं तत्वं समानाधिकरणेत्यस्यायमर्थः तत्पदत्वंपदरूपसमानाधिकरणपदयोः गौणं गौणत्वमिति। तन्मतायुक्तत्वे हेतुमाह। अभ्यासादेर्विरोधादिति। तस्य महावाक्यस्य प्रत्यगभिन्नब्रह्मविषयकोपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गविरोधात्। अभ्यासस्यादिः अभ्यासः आदिः यस्येति तत्पुरुषबहुव्रीही आश्रित्य अभ्यासादिश्चाभ्यासादिश्चेति समाहारैकशेषेण नपुंसकत्वे पुंवद्भावे च उक्तरूपसिध्या विवक्षितषड्विधतात्पर्यलिङ्गलाभः। उपपत्तिमात्ररूपतात्पर्यलिङ्गोपेतपरोदाहृतश्रुत्यपेक्षया षड्विधतात्पर्यलिङ्गोपेतछान्दोग्यश्रुतेरेव बलीयस्त्वात्। एतद्विरुद्धार्थकौशिकश्रुतेर्व्यावहारिकभेदपरत्वेनाप्युपपत्तेः। वस्तुतस्तु भिन्नोऽचिन्त्य इति भिन्न इति चिन्त्यो नेति अभेदप्रतिपादकछान्दोग्यश्रुत्यैकार्थ्याय व्याख्येयम्। निषेध्यभेदप्रसक्त्युपपादकत्वेन वाक्यशेषो योज्यः। उपसंहरति। तदादेरिति। तच्छब्दादिकस्य तत्त्वमस्यादिवाक्यस्य तत् तस्मात् रामानुजीयमाध्वमतसिद्धमहावाक्यार्थयोरनौचित्यात् सिद्धान्त्यभिमतब्रह्मजीवैक्यमेव तदर्थ इति सुष्ठूक्तम्॥ १८॥

इति अष्टमखण्डार्थसंग्रहः

अथ नवमः खण्डः

(अ. का.) ननु अष्टमखण्डे सुषुप्तौ या सत्सम्पत्तिरुक्ता। सा मम सन्दिग्धा सुषुप्तौ सत्सम्पत्तौ सत्सम्पन्नास्स्म इत्यनुसन्धानादर्शनादिति तत्संशयनिरासाय यथा सोम्येति नवमखण्डिका प्रवृत्ता। तदर्थमुपनिबध्नाति— नानेति।

(मू.) नानाजातीयवृक्षप्रसवरसचये नीयमाने मधुत्वं
सङ्कीर्णत्वान्न तेषां ग्रह इव सति सम्पत्तिरेवं प्रजानाम्।
संस्कारादेस्स्थिरस्य प्रतिनियतिजुषः प्राक्तनस्यानुवृत्या
व्याघ्रादित्वेन तस्मात् च्युतिरिति नवमे दर्शिताऽनाद्यविद्या॥

(व्या.) श्रौतनानात्ययपदस्य विवरणं नानाजातीयेति। तत्र भाष्ये नानागतीनामिति विवरणात् गतिशब्दस्य ज्ञानार्थत्वमाश्रित्य नानाप्रकारज्ञानवत्वलाभेन नानाजातीयत्वपर्यवसानम्। इदं नानादिक्कानामिति भाष्योक्तार्थस्याप्युपलक्षणम्। वृक्षाणां रसानित्यस्य तु पुष्पद्वारकरसो विवक्षित इति द्योतयितुं प्रसवरसेत्युक्तम्। पुष्परसचये मधुत्वं नीयमाने तेषां नानारसानां अयमस्य रसः अयमेतस्येति विवेको भेदेन ग्रहो न भवति। सङ्कीर्णत्वात्। तद्वत्, प्रजानां सुषुप्तौ सत्संपन्ना इति विवेको न भवति। अन्तःकरणरूपभेदकोपाधिशून्यत्वं सङ्कीर्णत्वं दार्ष्टान्तिके। ननु रसदृष्टान्तो न सङ्गच्छते। तेषामचेतनत्वेन विवेकानर्हत्वात्। प्रजानां च चेतनत्वेन विवेकसम्भवादिति चेन्न। चेतनानामपि सुषुप्त्यादौ जाड्यास्कन्दितया रसतुल्यत्वेन 'प्रकृतदृष्टान्तोपपत्तेः। ननु सुषुप्तौ अन्तःकरणोपाधिलयेन सद्रूपब्रह्मभावमापन्नानां तस्मात् व्याघ्रादिभावेन प्रच्युतिः कथमित्यत आह—संस्कारादेरिति। व्याघ्रोऽहमित्याद्यनुभवजन्यः संस्कारः। आदिपदेन व्याघ्रत्वप्रापककर्मपरिग्रहः। स्थिरस्येत्यनेन "युगसहस्रकोटयन्तरितापि संसारिणो या पुराभाविता वासना सा न नश्यती" ति भाष्यार्थस्संगृहीतः। सत्सम्पन्नस्य संसारिणः पुनरुत्थाने व्याघ्रादिरूपस्य कीटादिशरीरे प्रवेशः किं न स्यादित्यत आह। प्रतिनियतिजुषः प्राक्तनस्येति। अनुवृत्त्येति। एतेन स्वीयतत्तच्छरीरे व्याघ्रसिंहादेः व्याघ्रस्सिंह इत्यभिमाने प्राचीनप्रतिप्राणिव्यवस्थितनश्वरतत्तत्संस्कारानुवृत्तिरेव कारणमिति न कीटादिशरीरप्रवेश उपपद्यते, कारणाभावादिति स्पष्टम्। ननु संसारिण इव मुक्तानामपि पुनरागमनं स्यादिति चेन्न। तेषां सदहमस्मीति सद्रूपब्रह्मात्मभावेनैकीभूतानां अज्ञानतत्कार्यविलयनात् पुनः प्रवेशकारणाभावः। संसारिणां तु आत्मनस्सद्रूपतामज्ञात्वा सत्सम्पत्तेः पुनरुत्थानमिति मुक्तवैलक्षण्यम्। दर्शितानाद्यविद्येति। अस्मिन्नवमखण्डे 'सति सम्पद्य न विदु' रित्यनेन ज्ञानविरोध्यज्ञानमुक्तम्। तच्च शुद्धविषयकं चेत्। अनादित्वं तस्य निरपवादम्। सत्सम्पत्तिविशिष्टविषयकत्वपक्षेऽपि अज्ञानत्वात्तदनादित्वमिति मताभिप्रायेणानादित्वोक्तिरिति ॥ १९ ॥

इति नवमखण्डार्थसंग्रहः

अथ दशमः खण्डः

(अ. का.) ननु नवमखण्डे सुषुप्तौ प्रजानां सत्सम्पत्तिविषयकाज्ञानं ज्ञानजनकप्रमाणव्यापाराभावेन युज्यते। सुप्तादुत्थितानां तु प्रजानां गृहे सुप्त्वोत्थितस्य ग्रामान्तरं गतस्य गृहादागतोऽहमिति ज्ञानवत् सत आगताः स्म इति ज्ञानं कुतो न भवतीत्याशयेन भूय एवेत्यादि पृच्छन्तं शिष्यं प्रति तदुत्तरत्वेन प्रवृत्तः 'इमास्सोम्ये' त्यादिःदशमखण्डः। तदर्थं संगृह्णाति--प्राच्य इति।

(मू.) प्राच्यः काश्चित्प्रतीच्यः कतिचन सरितस्त्वागतास्तास्समस्ताः
मेघद्वारा समुद्राद्विदुरिह न यथा तादृशत्वं तथैषः।
जानात्यागत्य सत्यात् मुहुरपि न यतो जागरादौ जनौघः
तेनैक्यं तस्य सूक्तं पर इति भिदुरास्तत्र तत्रैव शङ्काः ॥२०॥

(व्या.) पीतसामुद्रजलैर्मेघैः वृष्टिद्वारा पातिताः प्राक् प्रत्यक्स्रोतसो गङ्गाद्या नद्यः समुद्रादागता इति यथा न जानन्ति, तथा सुप्तोत्थितो जनसंघस्सत्यादागतोऽहमिति न जानाति। आगमनावध्यपरिज्ञानात्। तच्च पूर्वखण्ड एवोक्तम्। दृष्टान्ते तु गृहे स्वप्स्यामीति ज्ञानपूर्वकतया सुप्तत्वात् तस्मादुत्थितस्य ग्रामं गतस्य आगमनावधिपरिज्ञानात् ज्ञानमिति वैषम्यम्। यद्यपि गङ्गाद्या नद्यः समुद्रात्मना एकतां गताः न जानीयुः। इयमहमस्मीयमहमस्मीत्यादिभाष्यग्रन्थेन ऐक्यावस्थायां इयं गङ्गास्मीति यमुनास्मीति न प्रतियन्तीति वर्णितम्। तथाऽपि समुद्रादिति श्रुतिपदेन समुद्रादागता इत्यर्थः प्रतीयते। ततश्च यथापूर्वं समुद्रे स्थित्वा समुद्रादागतास्तत आगमनानन्तरं समुद्रादागताः गङ्गाद्याः इयमहमस्मीति न विदुरित्येवंपरतया योजितं व्याख्यातृभिः। तादृशत्वं सत आगतत्वम्। तेन ब्रह्मणा तस्य जीवस्य ऐक्यं महावाक्येन सूक्तं सुष्ठूक्तम्। परे दशमे 'पूर्वादिभ्यो नवभ्यो वे' ति (पा. सू. ७-१-१६) स्मिन्नभावः। इति शब्दो दशमखण्डार्थसंग्राहकश्लोकार्थसमाप्तिद्योतनार्थः। प्रत्यक् ब्रह्मैक्यरूपमहावाक्यार्थः प्रतिखण्डं न भिद्यते। शङ्काः परं तत्र तत्र तत्तत्खण्डे भिदुराः भिन्ना इति तावन्मात्रेण खण्डार्थभेदसंग्रहो बोध्यः ॥ २० ॥

इति दशमखण्डार्थसंग्रहः

अथैकादशः खण्डः

(अ. का.) ननु जातो मृतो देवदत्त इति व्यवहारेण जीवस्य विनाशित्वात् अविनाशिब्रह्माभेदः कथमित्याशङ्कामपनेतुं दशमः खण्डः प्रवृत्तः। तदर्थसंग्राहकश्लोकोऽयं—सर्वत्रेति।

(मू.) सर्वत्राहन्यमानस्स्रवति तरुरयं पानमोदादियुक्तः
स्यास्नौ जीवेऽत्र तस्मिन्ननु जहति तु यात्येष शोषं क्रमेण।
जीवापेतं तथेदं वपुरयति मृतिं नो कदाचित्तु जीवः
तस्मात् ब्रह्मैक्यमर्हत्ययमिति घटितस्सम्यगेकादशेऽर्थः ॥२१॥

(व्या.) सर्वत्र अग्रमध्यमूलेषु आहन्यमानः परश्वादिनेति शेषः। एवम्भूतस्तरुस्स्रवति। स्रवन्रसः जीवसत्वे लिंगम्। पेपीयमानः मोदमान इत्येतत् पानमोदादियुक्त इत्यनेन गृहीतम्। अत्र आदिशब्देन रसभावहेतुभूतजीवकर्मपरिग्रहः। ननु अशितपीते रसात्मना परिणते सती जीवलिंगं भवत इत्युक्तम्। यदा तु एकांगवैकल्यनिमित्तं कर्म उपस्थितं भवति, तदा तेन रसभावहेतुभूतकर्म प्रतिबद्धं सत् रसपरिणामं न जनयति। ततश्च जीवस्थितिहेतुभूतस्यान्यस्याभावात् जीव उपसंहरत्यात्मानं तस्मादङ्गात्। तथा च यद्यदङ्गं जीवः अनुक्रमेण जहाति, तत्तदङ्गं क्रमेण शोषं यातीत्याह। तस्मिन्ननु जहतीति। तथा च जीवस्थितिहेतुकस्य रसस्य जीवस्याभावेऽपगमात् स एव शोष इति भावः। 'जीवापेत' मिति तृतीयचरणेन जीवापेतस्य शरीरस्य विनाशित्वेऽपि जीवस्य नित्यत्वेनाविनाशिब्रह्मैक्यं संघटयति। 'जातो मृत' इत्यादिव्यवहारस्य स्थूलशरीरोपाधिकत्वेन न साक्षाज्जीवविषयत्वम् ॥ २१ ॥

इति एकादशखण्डार्थसंग्रहः

अथ द्वादशः खण्डः

(अ. का.) ननु एकादशखण्डान्ते स्थूलस्य जगतो नामरूपवतस्तद्विपरीतादणोस्सद्रूपान्नामरूपरहितात् कथमुत्पत्तिः। न च न्यायमते सदणोः कारणात्

द्व्यणुकादेस्स्थूलस्य जगत उत्पत्त्यङ्गीकारात् वेदान्तिनोऽपि तत्सम्भव इति वाच्यम्। वेदान्तिनां सत्कार्यवादाङ्गीकारेण स्थूलस्य नामरूपवतः प्रपञ्चस्य तद्विपरीतसदणौ वृत्त्ययोगादिति शङ्कां भूयः प्रश्नहेतुभूतां परिहर्तुं द्वादशखण्डः प्रवृत्तः। तदर्थं संगृह्णन्नाह—नैय्यग्रोधमिति।

(मू.) **नैय्यग्रोधं त्वमस्मात्फलमुपहर तद्भिन्धि तस्मिंस्तु धानाः**
पश्यस्यण्वीर्यदीमाः शकलय पुनरास्वेकिकां तत्र किं ते।
दृश्यं पश्यामि नाहं किमपि यदि तदोत्तिष्ठतीतो यथाऽसौ
न्यग्रोधः श्रद्धधीथाः जगदपि सदणोस्स्यादिति द्वादशार्थः॥

(व्या.) 'न्यग्रोधफलमत आहरे' ति भागः नैय्यग्रोधं त्वमस्मात् फलमुपहरेत्यनेन संगृहीतः। तत्फलमाहृतं भिन्धीत्यर्थः। श्लोकस्थतत्पदेन 'इदं भगव' इति भागो गृहीतः। तस्मिन् फले अण्वीः अणुतराः धानाः वटकणिकाः पश्यसि यदि पश्यसि चेत्, अनेनानुवादबलेन शिष्यकर्तृकदर्शनमाक्षिप्तं, तच्च पश्यामीति पुरुषविपरिणामवत्पदानुवृत्तिमता 'अण्व्य इव इमा धाना' इति वाक्येन बोध्यते। अत्र परमाणूनां प्रत्यक्षत्वासम्भवादण्व्य इवेत्युक्तं श्रुतौ, आसु धानासु एकिकां शकलय भिन्धीत्यर्थः। तत्र किं ते दृश्यमिति आचार्यप्रश्नः, नाहं किमपि पश्यामीत्युत्तरम्। यद्येवं तदा यथा इतः वटबीजाणिम्नः सूक्ष्माददृश्यमानात् कार्यभूतः स्थूलशाखास्कन्धफलपलाशवान् उत्तिष्ठति उदतिष्ठदित्यर्थः। तिष्ठतीत्यत्र श्रुतौ भाष्ये च उत्पदस्य अध्याहृतत्वात् उत्तिष्ठतीति संगृहीतम्। तथा नामरूपवत् स्थूलं जगदपि सद्रूपादणिम्नस्स्यात् उत्पद्येत इत्येवं श्रद्दधीथाः श्रद्धत्स्वेत्यर्थः। यद्यपि न्यायागमाभ्यां निर्णीतोऽर्थः तथैवावतिष्ठति। तथाऽप्यत्यन्तसूक्ष्मेऽर्थे बाह्यविषयासक्तमनसः पुरुषस्यासक्त्यां गुरुतरायां श्रद्धायाः दूरापगतत्वमिति 'श्रद्धत्स्वे' त्यभिहितं श्रुत्याम्। ननु परिदृश्यमानस्य न्यग्रोधवृक्षस्य यत्फलं भिन्नं तद्गता वटकणिकास्तस्यैव वृक्षस्य कथं कारणं भवितुमर्हति तत्कार्यत्वादिति चेत्। सत्यं, एतद्वृक्षजनकाणिम्नः एतद्धानाणिम्नश्च वटधानाणिमत्वसामान्येन एकत्वमङ्गीकृत्य एतस्याणिम्न एष न्यग्रोधस्तिष्ठतीत्युक्तम्। तथा च इतइत्यस्य एतद्वृक्षफलधानासदृशवटकणिकाया इत्यर्थो ज्ञेय इति॥ २२॥

इति द्वादशखण्डार्थसंग्रहः

अथ त्रयोदशः खण्डः

(अ. का.) ननु यदि सत् वटधानाबीजवत् जगत्कारणं स्यात् तर्हि तद्वदेव सर्वैरप्युपलभ्येत । यदि सतो दुरवगमत्वात् तन्नोपलभ्येतेत्युच्यते । तदा मुमुक्षोः सज्ज्ञानाभावेन मुक्त्यभावप्रसङ्ग इति तदवगमोपायं, पृच्छतः अथवा सर्वत्र विद्यमानमपि सद्रूपं वस्तु स्थूलग्राहिप्रत्यक्षादिप्रमाणेनागृह्यमाणमपि आगमादिप्रमाणान्तरेण ग्रहीतुं शक्यत इत्यमुमर्थं सदृष्टान्तमुपपादयेति पृच्छतः श्वेतकेतोस्तदुत्तरत्वेन त्रयोदशखण्डः प्रवृत्तस्तदर्थं संगृह्णाति—रात्राविति ।

(मू.) रात्रौ प्रक्षिप्य तोये लवणघनमिदं प्रातरानीयतामि-
त्याज्ञावश्योऽवमृश्य स्वयमिदमसदित्यत्र मत्वा विलग्नम् ।
आचम्याचार्यसूक्त्या परित इह सदित्येव शिष्यो विजज्ञौ
तत्किंचिन्मानगम्यं किमपि न सुलभं त्वन्यथेत्युत्तरत्र ॥ २३ ॥

(व्या.) '[1]दोषे' त्यस्य विवरणं रात्राविति, लवणघनं दर्शनस्पर्शनार्हं लवणपिण्डम् । प्रातरानीयतामिति प्रातःपदेन 'अथ मा प्रातरुपसीदथा' इति आनीयतामित्यनेन 'यद्दोषा लवणमुदकेऽवाधा अङ्ग तदाहारे' ति च वाक्यद्वयस्यार्थस्संगृहीतः । आज्ञावश्यः गुर्वाज्ञापरतन्त्रः अवमृश्य स्पृष्ट्वा च । जलविलग्नं द्रवीभूय स्थितं । स्वयमसदिति मत्वा दर्शनस्पर्शनाभ्यामगृह्यमाणत्वात् । तत आदिमध्यान्तेषु क्रमेणाचामेत्याचार्यसूक्त्याऽचम्य इह जले परितस्सर्वत्रस्सदित्येव लवणं श्वेतकेतुः विजज्ञौ निश्चितवान् । तत् तस्मात् । अन्यथा मानान्तरेण न सुलभं वस्तु किंचिन्मानगम्यमेवेति त्रयोदशखण्डार्थसंग्रहः । उत्तरत्र द्वादशखण्डादुपरितने त्रयोदशखण्ड इत्यर्थः ॥ २२ ॥

इति त्रयोदशखण्डार्थसंग्रहः

अथ चतुर्दशः खण्डः

(अ. का.) ननु त्रयोदशखण्डान्ते लवणवदिन्द्रियावेद्यत्वेऽपि सतः श्रौतप्रमाणवेद्यत्वमस्तीत्युक्तम् । तच्च श्रुतिजन्यसज्ज्ञानमाचार्योपदिष्टवाक्यजनि-

[1] यद्दोषा लवणमुदक इत्युपनिषद्वाक्यगतस्य ।

तमेव फलोपयोगीति चतुर्दशखण्डेन प्रतिपाद्यते। तदर्थं संगृह्णाति—चोरैरिति।

(मू.) चोरैराबद्धनेत्रः क्वचिदपि विजने सोऽतिसृष्टस्त्वरण्ये
क्रोशन्गन्धारदेश्यः पुरुष इह कृपावश्यपुंसा प्रमुच्य।
देशं स्वं दर्शिताध्वा विशति कुशलधीस्तद्वदाचार्यवान्हि
ज्ञात्वाऽऽत्मानं यथावत् यति वपुषि सदेवेति चातुर्दशार्थः॥

(व्या.) "यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजे" दिति श्रुत्यर्थः प्रथमचरणेन गृहीतः। चोरैरित्यनेन धर्माधर्मादिकर्मणां, अरण्य इति पदेन तेजोबन्नमयशरीरस्य वातपित्तकफरुधिरमेदोमांसास्थिमज्जाशुक्रकृमिमूत्रपुरीषवतश्शीतोष्णादिद्वन्द्ववतः आबद्धनेत्र इत्यनेन मोहपटाभिनद्धनेत्रत्वस्य भार्यापुत्रपशुबन्ध्वादिदृष्टादृष्टानेकबन्धादितृष्णापाशितत्वस्य च भाष्योक्तस्य विवरणं कृतम्। क्वचिदप्यरण्ये विजने ततोऽपि महारण्ये अतिसृष्टः विसृष्ट इत्यर्थः। "स यथा तत्र प्राङ्वा उदङ्वाऽधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्ट" इति श्रुत्यर्थः क्रोशन्नित्यनेन गृहीतः। गन्धारदेश्यः गन्धारदेशीयः पुरुषः इह महारण्ये कृपानिधिना केनचित् पुंसा, प्रमुच्य, यथाभिनहनमोचनमत्र प्रशब्देन लभ्यते। दर्शिताध्वा उपदिष्टगन्धारदेशप्राप्त्युपायमार्गः कुशलधीः परोपदिष्टग्रामप्रवेशमार्गावधारणसमर्थः स्वं देशं गन्धारदेशं विशति तद्वत् यस्मात् स्वरूपात् प्रच्यावितः तं स्वरूपं प्रतिपद्यत इति यावत्। 'आचार्यवा' नित्यत्र विमुक्तबन्ध आचार्यः गृह्यते, हिरत्रावधारणे आचार्यवानेव वेद, अनेन आचार्योपदेशहीनस्य व्युत्पत्तिमतो जातमपि ज्ञानं नाविद्यानिवृत्तये भवतीति गम्यते। ज्ञात्वात्मानं यथावदिति परमकारुणिकेन ब्रह्मनिष्ठेन विमुक्तबन्धेन दर्शितसंसारविषयदोषदर्शनमार्गो विरक्तस्संसारविषयेभ्यः नासि त्वं संसारी अमुष्य पुत्रत्वादिधर्मवान्, किं तर्हि तत्वमसीति अविद्यामोहपटाभिहननात् मोक्षितः गन्धारपुरुषवच्च स्वं सदात्मानमुपसम्पद्य सुखी निर्वृतोऽस्मीति ज्ञानं विवक्ष्यते, एवं ज्ञात्वा मुक्तो भवति। एवंगुणकाचार्यतो मुक्ताविद्याभिहननस्य ज्ञानोत्तरक्षणमेव मुक्तिः उत प्रारब्धभोगसमाप्त्युत्तरमेवेति शङ्कायामाह। यति वपुषीति। वपुषि यति गच्छति

सति पतिते सतीत्यर्थः॥ आगामिसञ्चितयोः ज्ञाननिवर्त्यत्वेऽपि प्रारब्धस्य लक्ष्यमुक्तेषुन्यायेन स्ववेगक्षयपर्यन्तप्रतीक्षणस्य सोढव्यत्वात्। शरीरपातपर्यन्तं कालविलम्बः क्षेपणीयः इति भावः। अनेन च 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये' इति श्रुत्यर्थस्संगृहीतः। ननु शरीरपातानन्तरं उक्तज्ञानवान् किंरूप इति विशये आह। सदेवेति। एवकारेणाविद्यकधर्माः व्यावर्त्यन्ते सत्यज्ञानानन्दस्वरूप एव सम्पद्यत इत्यर्थः। इति चतुर्दशार्थः चतुरधिका दश चतुर्दश चतुर्दशानां पूरणः खण्डः चतुर्दशः तस्यार्थश्चातुर्दशः स चासावर्थश्चेति तथा॥ २४॥

इति चतुर्दशखण्डार्थसंग्रहः

अथ पञ्चदशः खण्डः

(अ. का.) ननु आचार्यवतः पुरुषस्य सत्सम्पत्तिक्रमः इहैव वा उत मूर्धन्यनाड्या निष्क्रम्य अर्चिरादिना वेति संशयनिरासार्थं 'पुरुषं सोम्योतोपतापिन' मिति पञ्चदशखण्डः प्रवृत्तः, तदर्थं संगृह्णाति—वागिति।

(मू.) वागादिब्रह्मसम्पत्क्रम इह विदुषो भिद्यते नेतरस्मात्
उत्थानं देहलब्ध्यै पुनरविदुषो नात इत्येव भेदः।
प्रागुक्तः प्रायणेऽसौ सदवगमकृते नास्त्यतः पौनरुक्त्यं
खण्डो माभूदुपान्त्योऽफल इति विषये धीर्न युक्ता नियन्तुम्॥

(व्या.) 'अथ यदाऽस्य वाङ्मनसि सम्पद्यते मनः प्राण' इत्यादि न्यायो ब्रह्मसम्पत्तिक्रमः उक्तः सः विद्वदविदुषोस्साधारण इति प्रथमचरणार्थः। उत्थानं विशेषविज्ञानलाभः अविदुषः अतः सतस्सकाशात् देहलाभाय उत्थानं भवति, विदुषस्तु तन्नास्ति अविद्याकामकर्मबीजानां ज्ञानाग्निना विप्लुष्टत्वादित्येतावान् भेद इत्यर्थः। नन्वष्टमखण्डे 'अस्य प्रयतो वाङ्मनसि सम्पद्यत' इति सत्सम्पत्तिराम्नाता अस्मिन्नपि खण्डे 'अथ यदास्य वाङ्मनसी' त्यादिकमाम्नातमित्यतः पौनरुक्त्यमित्यत आह—प्रागुक्त इति। पूर्वं स्वप्नखण्डिकायां

मरणकाले यस्मिन् सति सम्पद्यते विद्वानविद्वांश्च तथाविधं सदात्मतत्त्वमस्ति जीवस्य स्वरूपभूतमिति वक्तुं मरणक्रम उक्तः। इदानीं तु विदुषः इहैव सत्सम्पत्तिर्नाचिरादिक्रमेणेति वक्तुमिति न पुनरुक्तिर्दोषायेति भावः। नन्विहैव सत्सम्पत्तिर्नार्चिरादिनेति कथं गम्यत इति चेन्न। अस्यामेव खण्डिकायामथ न जानातीति विशेषविज्ञानसामान्याभावोक्तिद्वारा सर्वव्यवहाराभावोक्तेर्विवक्षितार्थलाभादिति भावः। ननु 'ज्ञातयः पर्युपासते जानासि मा जानासि मा' मिति प्रक्रम्य 'तस्य यावन्न वा' गित्यादिना 'तावज्जानाती' त्यन्तेन जात्यादिविशेषविषयकज्ञानस्यैव प्रतिपादितत्वात् 'अथ न जानाती' ति प्रतिषेधवाक्येऽस्मिन्नपि तस्यैव प्रतियोगित्वस्य युक्तत्वात् विशेषविज्ञानसामान्याभावो न लभ्येतेत्यत आह। खण्डो माभूदुपान्त्य इति। उपान्त्यः खण्डः पञ्चदशखण्डः अफलः निष्फलस्स्यात् यदि ज्ञात्यादिविषयकविशेषविज्ञानाभावमात्रं 'अथ न जानाती' त्यनेन उच्येत तदा अस्य खण्डस्य वैफल्यमेव स्यात् लोकसिद्धार्थानुवादमात्रत्वापत्तेः। अतः ज्ञात्यादिविशेषविषयकविज्ञानाभावं विहाय सर्वविशेषविषयकविज्ञानाभावमात्रं बोध्यत इति वक्तव्यं तथा च सति 'यत्र नान्यत् पश्यति नान्यच्छृणोति' इति श्रुतिसिद्धसर्वविशेषविज्ञानाभावोपलक्षितसच्चिदानन्दात्मकस्वरूपसम्पत्तिरूपपुरुषार्थसिध्या खण्डसाफल्यं भवतीति भावः। विषये प्रकृतज्ञात्यादिविशेषविषयकविज्ञानाभावरूपे धीः 'अथ न जानाती' ति वाक्यजनिता बुद्धिः नियन्तुं सङ्कोचयितुं न युक्तेति ॥ २५ ॥

इति पञ्चदशखण्डार्थसंग्रहः

अथ षोडशः खण्डः

(अ. का.) ननु विद्वदविदुषोस्सत्सम्पत्तेस्तुल्यत्वेऽपि विद्वान्नावर्तते अविद्वानावर्तत इत्यत्र कारणं विद्याविद्ये इत्युक्तं पञ्चदशखण्डे तमर्थं दृष्टान्तेनोपपादयेति भूयः प्रश्नप्रवृत्तेः तदुत्तरत्वेन षोडशखण्डः प्रवृत्तः। तदर्थं सङ्गृह्णाति—हस्ताविति।

(मू.) हस्तावाबध्य चोरोऽयमिति नृपभटैर्नीयमानस्तदाहं
नास्मीत्याख्याय तप्तं परशुमिह करे धारयन्दह्यमानः ।
चोरो हन्येत नान्यस्त्वनृतविमुखधीर्दह्यते मुच्यतेऽसौ
तद्वत्सत्यात्मबुद्धेरितरविषमता सद्गतौ दर्शिताऽन्त्ये ॥ २६ ॥

(व्या.) "पुरुषं सोम्योत हस्तगृहीतमानयन्त्यपहार्षी" दिति श्रुत्यर्थः 'हस्तावाबध्य चोरोऽयमिति नृपभटैर्नीयमान' इत्यनेन गृहीतः । 'परशुमस्मै तपते' ति श्रुत्यर्थान्यथानुपपत्तिपरिहाराय परिपूरितस्य नाहं कर्तेति कोटचन्तर-भूतभाष्योक्तार्थस्य तथाऽहं नास्मीत्याख्यायेत्यनेन संग्रहः कृतः । राजपुरुषवाक्येन चोरवाक्येन च आनीयमानपुरुषे स्तैन्यकर्तृत्वाकर्तृत्वसंशये सति अन्यतरनिर्णयाय तप्तपरशुग्रहणेनात्मशोधनं कारयितुं 'परशुमस्मा इति ग्रन्थः प्रवृत्तः । अथ यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृते-नात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यते अथ हन्यते' इति भागः तप्तं परशुमिह करे धारयन् दह्यमानश्चोरो हन्येतेत्यनेन गृहीतः । "अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धस्सत्ये-नात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यते अथ मुच्यत" इति भागः नान्यस्त्वनृतविमुखधीः दह्यते मुच्यतेऽसावित्यनेन गृहीतः । यथाऽनृताभिसन्धस्य दाहेन हननं, तथाकर्तृत्वादिमति स्वस्वरूपे कर्तृत्वादिमत्वेन भ्रान्तस्य अविद्यादिमत आवृत्तिः यथा वा सत्याभिसन्धस्यादाहेन मोचनं, तद्वत् कर्तृत्व भोक्तृत्वादिबन्धविनिर्मुक्तसदात्मकब्रह्माहमस्मीत्यात्मानं जानानस्य सद्गतौ सत्सम्पत्तौ इतरविषमता पुरुषवैलक्षण्यं अनावृत्तिरिति अन्त्ये षोडशखण्डे दर्शितेति ॥ २६ ॥

इति षोडशखण्डार्थसंग्रहः

अथ षष्ठाध्यायार्थसारसङ्ग्रहनिरूपणम्

(अ. का.) षष्ठाध्यायार्थमुपसंहरन् "तद्धास्य विजज्ञा" विति वाक्यार्थ-मुपदर्शयति—श्रुत्वेति ।

(मू.) श्रुत्वेति श्रीमदुद्दालकमुनिमुखतश्श्रद्धया श्वेतकेतुः
विद्वानद्वैततत्वं कृतमनननिदिध्यासनस्संविलोक्य ।
कैवल्यं प्राप तस्मात् गुरुवरमुपसम्पद्येतरो मोक्षमाणो
ऽप्यात्मानं चेद्यथावन्मनुत इह कृतीत्येवमाख्यायिकार्थः ॥

(व्या.) इति ऐवंप्रकारेण। प्रकारश्च एकविज्ञानेन सर्वविज्ञानादिः। तथा हि एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात् तस्य च "यथा सोम्यैकेन मृत्पिण्डेन" इत्यादिदृष्टान्तैः 'वाचारम्भणं विकार' इत्याद्युपपत्तिभिश्च उपपादनेन मुख्यत्वावगमात् 'एकमेवाद्वितीय' मित्यद्वितीयत्वमुपक्रम्य तस्यापि 'तदैक्षते' त्यादिना सर्वोपादानत्वेन जन्यप्रपञ्चाभेदस्य 'अनेन जीवेनात्मनाऽनुप्रविश्ये' ति प्रवेशद्वारा चेतनाभेदस्य युक्त्या उपपादनेन मुख्यत्वप्रतिपादनात् "अपागादग्नेरग्नित्वं वाचारम्भणं विकार" इत्यादिना कार्यस्य मृषात्वप्रतिपादनेन कर्तृत्वादेर्विरुद्धधर्मस्य मृषात्वोक्तेः 'स्वमपीतो भवती' ति स्वापे सत्सम्पत्त्याऽभेदमुक्त्वा तत्र भेदप्रतीतिविरोधमाशंक्य 'स यथा शकुनिरि' ति दृष्टान्तपूर्वमेव 'तन्मनः प्राणमेवोपश्रयत' इत्यादिना मनसि सति भेदव्यवहारः, तदभावे स नास्तीति औपाधिकविरोधं परिहृत्य अभेदस्थिरीकरणात्, 'प्राणस्तेजसि तेजः परस्यां देवतायां' इति मरणकाले प्राणस्याभावेन अतिस्फुटं सत्सम्पत्युक्तेश्च तत्तदाशङ्कानिराकरणपूर्वकं 'तत्वमसी' ति नवकृत्वोऽभ्यासात् 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिर' मित्युपदेशजनितज्ञानस्यैव सत्सम्पत्तिफलत्वोक्तेः तप्तपरशुदृष्टान्तेन सत्याभिसन्धस्य मोक्षप्रतिपादनेन तद्धास्योद्दालकस्य वचनात् 'विजज्ञावि' ति वाक्यजन्यज्ञानमात्रेण उपरमाच्च उपासनादियोगनिष्ठत्वायोगात् निरङ्कुशमनुपचरितं सदात्मतत्वमुपदिदेशेत्यपि द्रष्टव्यम्। श्वेतकेतुः श्रीमदुद्दालकमुनिमुखात् उद्दालकाख्यऋषिमुखकमलात् पितुस्सकाशात् श्रुत्वा कृतमनननिदिध्यासनस्सन् संविलोक्य अप्रामाण्यादिदोषानास्कन्दितत्वेनापरोक्षीकृत्य तस्मात् उक्तापरोक्षज्ञानात् कैवल्यं स्वस्वरूपेणावस्थानलक्षणं प्राप। अत्र च प्राप्तिः कण्ठगतविस्मृतचामीकरमालावद्। अनवच्छिन्नानन्दरूपस्य प्रत्यगात्मन एव अत्र मनननिदिध्यासन इति विशेषणं 'आत्मा वाऽरे द्रष्टव्यःश्रोतव्यो मन्तव्यो निदिध्या-

सितव्य' इति बृहदारण्यके आत्मसाक्षात्कारोद्देशेन श्रवणवत् मनननिदिध्यासनयोरपि साधनतया विधानमपेक्ष्योक्तम् । यदि च पुरुषधौरेयस्य जन्मान्तरीयपुण्यातिशयपरिपाकवशात् निरस्तप्रमाणासम्भावना—प्रमेयासम्भावनाविपरीतभावनारूपदोषत्रयस्य उपदेशमात्रादपि फलीभूतापरोक्षज्ञानस्याविद्यानिवर्तकस्य सम्भवः, तदा मननादिनिरपेक्षमेव 'तद्धास्य विजज्ञा' विति वाक्यात् शाब्दापरोक्षं भवति । तत् ह प्रत्यगभिन्नं सदात्मतत्वं अस्य पितुस्सकाशात् विजज्ञौ विशेषेण ज्ञातवान् साक्षात्कृतवानिति हि तस्यार्थः । पितापुत्राख्यायिकारूपेण श्रुतिप्रवृत्तेः फलमाह । गुरुवरमिति । श्वेतकेतोरन्योऽपि मोक्षमाणः मुमुक्षुः गुरुवरं यथावत् उपसम्पद्य यथावन्मनुते चेत् इह अस्मिन्लोके कृती कृतकृत्यो भवतीत्याख्यायिकार्थः आख्यायिकाफलम् ।। २७ ।।

ग्रन्थसमर्पणम्

(अ. का.) स्वजन्मसाफल्याय विरचितसद्विद्याविलासाख्यग्रन्थं भगवति श्रीमत्त्यागेशेऽर्पयति—स्वाभिव्यक्त्येति ।

(मू.) स्वाभिव्यक्त्याऽविमुक्तादपि महिततरं तन्वतस्तापसानां
वल्मीकक्षेत्रमत्राधिकमतिसृजतो मुक्तिमुत्पत्तिभाजाम् ।
विन्यस्ता रत्नसिंह्मासनमधिवसतस्स्कन्दशैलेन्द्रजाभ्यां
त्यागेशस्याधिकण्ठं लसतु सरसगीः हाल्लकीव स्रगेषा ।। २८ ।।

(व्या.) वल्मीकक्षेत्रं स्वाभिव्यक्त्या अविमुक्तादपि श्रीकाशीक्षेत्रादपि तापसानां महिततरं तन्वतस्तापसैरतिशयेन पूज्यमानं कुर्वतः अत्र वल्मीकक्षेत्रे उत्पत्तिभाजां जनिमतां अधिकं मोक्षमाणकृतमुक्तिसाधननिरपेक्षं मुक्तिमतिसृजतः ददतः स्कन्दशैलेन्द्रजाभ्यां रत्नसिंह्मासनमधिवसतः 'उपान्वध्याङ्वसः' (पा. सू. १-४-४८) इति कर्मत्वम् । त्यागेशस्याधिकण्ठं कण्ठे । विभक्त्यर्थेऽव्ययीभावः । एषा सरसगीः सद्विद्याविलासरूपा रसेन सहिता सरसा 'रसो वै स' इति श्रुतिप्रसिध्या आनन्दरूपा सदाख्या देवता रसः । सरसा च सा

गीश्चेति रसशब्दितानन्दरूपसदाख्यदेवताप्रतिपादिका हाल्लकी स्रगिव कल्हार-मालेव विन्यस्ता सती लसतु प्रकाशतामित्यर्थः ।। २८ ।।

श्रीमदप्पय्यमखीन्द्रवंशजत्यागराजकृतिना कृतिः कृता ।
सामगोपनिषदर्थसारवत्याहिमांशुमिहिरं जयत्वियम् ।।

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभ-चतुरधिकशतप्रबन्धनिर्माणा-
लङ्कर्मीण-श्रीकण्ठमतप्रतिष्ठापनाचार्य-श्रीमदद्वैतविद्यार्यश्रीम-
दप्पय्यदीक्षितेन्द्रवंशमौक्तिकायमान-श्रीमत्यागराजमखि-
विपश्चित्कृतिषु रसानुभूतिव्याख्यासंवलितसद्विद्या-
विलासनामकग्रन्थः संपूर्णः ।

।। श्रीमच्छङ्करभगवत्पादपादारविन्दाभ्यां नमः ।।

छान्दोग्योपनिषत्

षष्ठोऽध्यायः

प्रथमः खण्डः

ॐ। श्वेतकेतुर्हारुणेय आस तँ ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति ॥ १ ॥ स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय तँ ह पितोवाच श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः ॥ २ ॥ येनाश्रुतँ श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति ॥ ३ ॥ यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातँ स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥ ४ ॥ यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातँ स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् ॥ ५ ॥ यथा सोम्यैकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातँ स्याद्वाचारम्भणं विकारो नामधेयं कार्ष्णायसमित्येव सत्यमेवँ सोम्य स आदेशो भवतीति ॥ ६ ॥ न वै नूनं भगवन्तस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन्कथं मे नावक्ष्यन्निति भगवांस्त्वेव मे तद्ब्रवीत्विति तथा सोम्येति होवाच ॥ ७ ॥

इति प्रथमः खण्डः

अथ द्वितीयः खण्डः

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ॥ तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत ॥ १ ॥ कुतस्तु खलु सोम्यैवँ स्यादिति होवाच कथमसतः सज्जायेतेति। सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ॥ २ ॥ तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत

बहु स्यां प्रजायेयेति तदपोऽसृजत तस्माद्यत्र क्वच शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायन्ते ॥ ३ ॥ ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त तस्माद्यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तदध्यन्नाद्यं जायते ॥ ४ ॥

इनि द्वितीयः खण्डः

अथ तृतीयः खण्डः

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति ॥ १ ॥ सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति ॥ २ ॥ तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् ॥ ३ ॥ तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा नु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥ ४ ॥

इति तृतीयः खण्डः

अथ चतुर्थः खण्डः

यदग्ने रोहितँ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ १ ॥ यदादित्यस्य रोहितँ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादादित्यदादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ २ ॥ यच्चन्द्रमसो रोहितँ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ३ ॥ यद्विद्युतो रोहितँ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ॥ ४ ॥ एतद्ध स्म वै तद्विद्वाँस आहुः पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदाञ्चक्रुः ॥ ५ ॥ यदु

रोहितमिवाभूदिति तेजसस्तद्रूपमिति तद्विदाञ्चक्रुर्यदु शुक्लमिवाभूदित्यपाँ रूपमिति तद्विदाञ्चक्रुर्यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदाञ्चक्रु: ॥ ६ ॥ यद्वविज्ञातमिवाभूदित्येतासामेव देवतानाँ समास इति तद्विदाञ्चक्रुर्यथा खलु नु सोम्येमास्तिस्रो देवता: पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥ ७ ॥

इति चतुर्थ: खण्ड:

अथ पञ्चम: खण्ड:

अन्नमशितं त्रेधा विधीयते तस्य य: स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्माँसं योऽणिष्ठस्तन्मन: ॥ १ ॥ आप: पीतास्त्रेधा विधीयन्ते तासां य: स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठ: स प्राण: ॥ २ ॥ तेजोऽशितं त्रेधा विधीयते तस्य य: स्थविष्ठो धातुस्तदस्थि भवति यो मध्यम: स मज्जा योऽणिष्ठ: सा वाक् ॥ ३ ॥ अन्नमयँ हि सोम्य मन आपोमय: प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ४ ॥

इति पञ्चम: खण्ड:

अथ षष्ठ: खण्ड:

दध्न: सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्व: समुदीषति तत्सर्पिर्भवति ॥ १ ॥ एवमेव खलु सोम्यान्नस्याश्यमानस्य योऽणिमा स ऊर्ध्व: समुदीषति तन्मनो भवति ॥ २ ॥ अपाँ सोम्य पीयमानानां योऽणिमा स ऊर्ध्व: समुदीषति स प्राणो भवति ॥ ३ ॥ तेजस: सोम्याश्यमानस्य योऽणिमा स ऊर्ध्व: समुदीषति सा वाग्भवति ॥ ४ ॥ अन्नमयँ हि सोम्य मन आपोमय: प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ५ ॥

इति षष्ठ: खण्ड:

अथ सप्तमः खण्डः

षोडशकलः सोम्य पुरुषः पञ्चदशाहानि माशीः काममपः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यत इति ॥ १ ॥ स ह पञ्चदशाहानि नाशाथ हैनमुपससाद किं ब्रवीमि भो इत्यृचः सोम्य यजूँषि सामानीति स होवाच न वै मा प्रतिभान्ति भो इति ॥ २ ॥ तँ होवाच यथा सोम्य महतोऽभ्याहितस्यैकोऽङ्गारः खद्योतमात्रः परिशिष्टः स्यात्तेन ततोऽपि न बहु दहेदेवँ सोम्य ते षोडशानां कलानामेका कलातिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवस्यशानाथ मे विज्ञास्यसीति ॥ ३ ॥ स हाशाथ हैनमुपससाद तँ ह यत्किञ्च पप्रच्छ सर्वँ ह प्रतिपेदे ॥ ४ ॥ तँ होवाच यथा सोम्य महतोऽभ्याहितस्यैकमङ्गारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय प्राज्वलयेत्तेन ततोऽपि बहु दहेत् ॥ ५ ॥ एवँ सोम्य ते षोडशानां कलानामेका कलातिशिष्टाभूत्सान्नेनोपसमाहिता प्राज्वाली तयैतर्हि वेदाननुभवस्यन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ६ ॥

इति सप्तमः खण्डः

अथ अष्टमः खण्डः

उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनँ स्वपितीत्याचक्षते स्वँ ह्यपीतो भवति ॥ १ ॥ स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनँ हि सोम्य मन इति ॥ २ ॥ अशनापिपासे मे सोम्य विजानीहीति यत्रैतत्पुरुषोऽशिशिषति नामाप एव तदशितं नयन्ते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षतेऽशनायेति तत्रैतच्छुङ्गमुत्पतितँ सोम्य विजानीहि नेदममूलं भविष्यतीति ॥ ३ ॥ तस्य क्व मूलँ स्यादन्यत्रान्नादेवमेव खलु सोम्यान्नेन शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन

तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ॥ ४ ॥ अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्ट उदन्येति तत्रैतदेव शुङ्गमुत्पतितँ सोम्य विजानीहि नेदममूलं भविष्यतीति ॥ ५ ॥ तस्य क्व मूलँ स्यादन्यत्राद्भ्योऽद्भिः सोम्य शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा यथा नु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् ॥ ६ ॥ स य एषोऽणिमैतदात्म्यमिदँ सर्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ७ ॥

इति अष्टमः खण्डः

अथ नवमः खण्डः

यथा सोम्य मधुः मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणाँ रसान्समवहारमेकताँ रसं गमयन्ति ॥ १ ॥ ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह इति ॥ २ ॥ त इह व्याघ्रो वा सिँहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दँशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति ॥ ३ ॥ स य एषोऽणिमैतदात्म्यमिदँ सर्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ४ ॥

इति नवमः खण्डः

अथ दशमः खण्डः

इमाः सोम्य नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियन्ति स समुद्र एव भवति ता यथा तत्र न विदुरियमहमस्मीय-

महमस्मीति ॥ १ ॥ एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगम्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिँहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दँशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदँ सर्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति दशमः खण्डः

अथ एकादशः खण्डः

अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन्स्रवेद्यो मध्येऽभ्याहन्याज्जीवन्स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन्स्रवेत्स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति ॥ १ ॥ अस्य यदेकाँ शाखां जीवो जहात्यथ सा शुष्यति द्वितीयां जहात्यथ सा शुष्यति तृतीयां जहात्यथ सा शुष्यति सर्वं जहाति सर्वः शुष्यति ॥ २ ॥ एवमेव खलु सोम्य विद्धीति होवाच जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिदँ सर्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति एकादशः खण्डः

अथ द्वादशः खण्डः

न्यग्रोधफलमत आहरेतीदं भगव इति भिन्द्धीति भिन्नं भगव इति किमत्र पश्यसीत्यण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्द्धीति भिन्ना भगव इति किमत्र पश्यसीति न किञ्चन भगव इति ॥ १ ॥ तँ होवाच यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति द्वादशः खण्डः

अथ त्रयोदशः खण्डः

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति स ह तथा चकार तँ होवाच यद्दोषा लवणमुदकेऽवाधा अङ्ग तदाहरेति तद्धावमृश्य न विवेद ॥ १ ॥ यथा विलीनमेवाङ्गास्यान्तादाचामेति कथमिति लवणमिति मध्यादाचामेति कथमिति लवणमित्यन्तादाचामेति कथमिति लवणमित्यभिप्रास्यैतदथ मोपसीदथा इति तद्ध तथा चकार तच्छश्वत्संवर्तते तँ होवाचात्र वाव किल सत्सोम्य न निभालयसेऽत्रैव किलेति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदँ सर्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति त्रयोदशः खण्डः

अथ चतुर्दशः खण्डः

यथा सोम्य पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत्स यथा तत्र प्राङ्वोदङ्वाधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः ॥ १ ॥ तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन्पण्डितो मेधावी गन्धारानेवोपसम्पद्येतैवमेवेहाचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदँ सर्वं तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति चतुर्दशः खण्डः

अथ पञ्चदशः खण्डः

पुरुषँ सोम्योतोपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ् मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति ॥ १ ॥ अथ यदास्य वाङ् मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामथ न जानाति ॥ २ ॥ स य एषोऽणिमैतदात्म्यमिदँ सर्वं

तत्सत्यँ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ ३ ॥

इति पञ्चदशः खण्डः

अथ षोडशः खण्डः

पुरुषँ सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मै तपतेति स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते ॥ १ ॥ अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते ॥ २ ॥ स यथा तत्र नादाह्येतैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ३ ॥

इति षोडशः खण्डः

॥ इति छान्दोग्योपनिषदि षष्ठोऽध्यायः ॥

—***—

सद्विद्याविलासान्तर्गतमूलश्लोकानुक्रमणिका

		पुटसंख्या
१.	अग्न्यादेर्यद्धि रूपं	४८
२.	अद्वैतात्मा हि	४
३.	एकैकं तच्च भूतं	४६
४.	कल्प्यो बालैः	३६
५.	ख्याताश्चाऽनवमतयैव	३
६.	चोरैराबद्धनेत्रः	६१
७.	दध्नस्सर्पिर्यथोदीषति	४९
८.	नत्वा मार्गसहाय	५
९.	नानाजातीयवृक्ष	५५
१०.	नापेक्ष्यं शासितृत्वं	२७
११.	नासावादेशशब्द	२०
१२.	नैय्यग्रोधं त्वमस्मात्	५९
१३.	प्रष्टव्यत्वोक्तितस्स्यात्	३५
१४.	प्राच्यः काश्चित्प्रतीच्यः	५७
१५.	प्रालेयाचलकन्यका	१
१६.	ब्रह्मात्मैक्याशयस्य	६
१७.	भुक्तान्नस्य स्थविष्ठं	४८
१८.	मुक्तौ तत्साधने	२८
१९.	यत्र स्वात्मन्यपीत	५०
२०.	रात्रौ प्रक्षिप्य तोये	६०
२१.	वागादिब्रह्मसम्पत्क्रम	६२
२२.	शब्दो देहाभिधायी	५२
२३.	श्रुत्वेति श्रीमदुद्दालक	६५
२४.	सर्वत्राहन्यमानस्स्रवति	५८
२५.	सृष्टेः पूर्वं	४३
२६.	स्वाभिव्यक्त्याऽविमुक्तादपि	६६
२७.	स्वेनाज्ञप्तं गुरोः	७
२८.	हस्तावाबध्य चोरः	६४

रसानुभूतिव्याख्यायां परामृष्टा ग्रन्थाः

छान्दोग्योपनिषत्

श्वेताश्वतरोपनिषत्

तैत्तरीयोपनिषत्

बृहदारण्यकोपनिषत्

मुण्डकोपनिषत्

कठोपनिषत्

याज्ञवल्क्यस्मृतिः

मनुस्मृतिः

पातञ्जलयोगसूत्रम्

पाणिनिसूत्राणि

गौतमधर्मसूत्रम्

जैमिनिसूत्राणि

ब्रह्मसूत्राणि

शङ्करभगवत्पादभाष्यम्

रामानुजभाष्यम्

महाभाष्यम्

मध्वभाष्यम्

कुमारिलवार्तिकम्

भगवद्गीता

नामलिङ्गानुशासनम्

न्यायरक्षामणिः

नागेशभट्टग्रन्थः

कैयटकृतप्रदीपः

सुदर्शनाचार्यकृतः
चतुर्वेदतात्पर्यसंग्रहः

खण्डदेवकृतभाट्टदीपिका

रङ्गरामानुजीयव्याख्यानम्

शिवरहस्यम्

नीलकण्ठविजयचम्पूः

दशप्रकरणम्